केरलपाठावलिः

# संस्कृतम्

पञ्चमी कक्ष्या

# अध्यापकमित्रम्

## TEACHER TEXT BOOK

KERALA READER

# SANSKRIT

## Standard – V

Government of Kerala
Department of General Education
State Council of Educational Research and Training (SCERT), Kerala 2024

## भूमिका

प्रवर्तनाधिष्ठिता छात्रकेन्द्रिता च पाठ्यपद्धतिः एव इदानीं प्रचाल्यमाना अस्ति। छात्राणां सर्वतोमुखविकासः एवास्याः पद्धत्याः लक्ष्यम्। शिशोः स्तरानुसारं विविधैः व्यवहाररूपैः सम्पुष्टमस्ति पञ्चमकक्ष्यायाः पाठ्यपुस्तकम्। सरलतया प्रवर्तनानाम् अनुशीलनाय प्रवर्तनपुस्तकस्थं प्रवेशकप्रवर्तनं, पाठभागः, पठनप्रवर्तनानि, अनुबन्धः चेति क्रमः एकैकस्मिन् एकके स्वीकृतः। एतेषां प्रवर्तनानाम् आविष्करणाय अध्यापकस्य सहायकं भविष्यतीदं पुस्तकम्। पाठपुस्तके निर्दिष्टानां सर्वेषां प्रवर्तनानाम् आयोजनक्रमः, उत्पन्नरूपेण परिकल्पनीयाः अंशाः, मूल्यनिर्णयसूचकाः च सहायकपुस्तकेऽस्मिन् निर्दिष्टाः भवन्ति। इतोऽप्यधिकानि पठनप्रवर्तनानि कक्ष्यायां परिशीलयितुम् अध्यापकस्य स्वातन्त्र्यमस्ति। लिखितानां प्रवर्तनानां परिशीलनेन छात्राः भाषाप्रयोगे समर्थाः भवेयुः। निरन्तरमूल्यनिर्णयस्य सफलीकरणाय अध्यापकः यतताम्। तदर्थम् अध्यापकसाहाय्यपुस्तकमिदम् उपकारकं भवेत्।अपि च संस्कृतपठनं सर्वथा मधुरं सफलं च भवतु इति आशासे।

भवदीयः
**डा. जयप्रकाश् आर् के**
निदेशकः
राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलम्

# विषयानुक्रमणिका


| एककम् | | पाठस्य नाम | व्यवहाररूपम् | पुटसंख्या |
|---|---|---|---|---|
| १ सुन्दरप्रकृतिः | १ | जीवनं मनोहरम् | बालकविता | 05 - 10 |
| | २ | अवधानेन कर्तव्यम् | चित्रकथा | 11 - 15 |
| | ३ | वर्षाचित्रम् | लघुविवरणम् | 16 - 19 |
| २ सार्थकं जीवितम् | ४ | सौहार्दकुसुमानि | सुभाषितम् | 20 - 24 |
| | ५ | सर्वे भवन्तु सुखिनः | सम्भाषणम् | 25 - 29 |
| | ६ | अभयदा माता | विवरणम् | 30 - 33 |
| ३ स्वास्थ्यं जीवनम् | ७ | अन्नम् आरोग्याय | चित्रकथा | 34 - 39 |
| | ८ | होक्की | लघूपन्यासः | 40 - 42 |
| ४ सर्गात्मिका कला | ९ | चलच्चित्रम् | सचित्रविवरणम् | 43 - 49 |
| | १० | श्रुतिसुखदम् | लघुविवरणम् | 50 - 54 |

## वार्षिकासूत्रणम्

| क्रमसंख्या | मासः | पाठः | कालांशः | प्रवर्तनानि |
|---|---|---|---|---|
| 1 | जूण् | जीवनं मनोहरम् | 14 | पुष्पाणां जीवजालानां नामलेखनम्, कवितालपनम्, चित्रस्य वर्णलेपनम्, आशयलेखनम्, सूचनानुसारलेखनम्। |
| 2 | जूलै | अवधानेन कर्तव्यम् | 14 | आशयानुसारं चित्रयोजनम्, उचितवर्णलेपनम्, कथावतरणम्, पक्षिमृगादीनाम् नामलेखनम्, नूतनपदानाम् अर्थलेखनम्, चित्रपदकोशनिर्माणम्, क्रियापदयोजनम्, प्रश्नोत्तरकेलिः। |
| 3 | जूलै आगस्त् | वर्षा-चित्रम् | 13 | चित्रसम्पुटरचना, टिप्पणीलेखनम्, भित्तिपत्रिकारचना, ऋतूनां नामलेखनम्, क्रियापदपूरणम्, पादटिप्पणीलेखनम्। |
| 4 | आगस्त् सेप्तम्बर् | सौहार्द-कुसुमानि | 13 | सुभाषितालपनम्, नूतनपदानाम् अर्थलेखनम्, आशयानुसारं सुभाषितलेखनम्, सुभाषितसम्पुटरचना, आशयलेखनम्, शब्दरूपपूरणम्। |
| 5 | ओक्टोबर् | सर्वे भवन्तु सुखिनः | 13 | सम्भाषणावतरणम्, नूतनपदानाम् अर्थलेखनम्, चर्चा, सम्बोधनरूपाणां पूरणम्, आचारोपचारशब्दानां लेखनम्, लकारपूरणम्। |
| 6 | नवम्बर् | अभयदा माता | 12 | उचितपदपूरणम्, चित्रसम्पुटनिर्माणम्, वाक्यलेखनम्, क्रियापूरणम्, |
| 7 | नवम्बर् डिसम्बर् | अन्नम् आरोग्याय | 13 | चर्चा, पदानाम् अर्थलेखनम्, टिप्पणीलेखनम्, सम्भाषणावतरणम्, लट्-लोट् रूपाणां लेखनम्। |
| 8 | जनुवरि | होक्की | 13 | यथोचितयोजनम्, पेटिकापूरणम्, पदपूरणम्, संख्यानुसारचित्रयोजनम्, संख्यापूरणम्, वर्णलेपनम्। |
| 9 | फेब्रुवरि | चलच्चित्रम् | 13 | सूचनानुसारं चर्चा, अवतारणम्, नूतनपदानाम् अर्थलेखनम्, प्रश्ननिर्माणम्, चलच्चित्रनिर्माणम्, अवतारणम्, दिनदर्शिकापरिचायनम्। |
| 10 | फेब्रुवरि मार्च् | श्रुति सुखदम् | 12 | कवितासमाहारमधिकृत्य चर्चा, नूतनपदानाम् अर्थलेखनम्, सूचनानुसारं लघुवाक्यलेखनम्, यथोचित योजनम्, प्रश्नोत्तरलेखनम्। |
| 11 | मार्च् | | | पुनरावृत्तिः |

# एककम् - १

# सुन्दरप्रकृतिः

प्रकृतिः अस्माकं जीवदायिनी भवति। प्रकृत्या सह जीवनम् आनन्ददायकं भवति। प्रकृतिं विना जीवराशेः सुस्थितिः न सम्भवति। अतः प्रकृतिः माता इव परिपालनीया संरक्षणीया च। प्रशस्तमिदं वेदवाक्यं श्रूयते 'माता भूमिः पुत्रोऽहं पृथिव्याः' इति। प्रकृतेः सौन्दर्यं विभवसमृद्धिश्च संरक्षणीयं परिपालनीयञ्च इत्याशययुक्ताः त्रयः पाठाः अत्र सन्निवेशिताः। पाठभागानामेषाम् अध्ययनेन प्रकृतेः महत्वं प्राधान्यञ्च चर्चयन्ति।

## प्रथमः पाठः

# जीवनं मनोहरम्

| | |
|---|---|
| **आशयः** | प्रकृतिः |
| **उपाशयः** | प्रकृतिसौन्दर्यम् |
| **व्यवहाररूपम्** | कविता |
| **उद्देश्यानि/ लक्ष्याणि** | प्रकृतेः महत्त्वं वैविध्यञ्च अवगच्छति।<br>प्रकृतिसंरक्षणस्य आवश्यकतां प्रत्यभिजानाति। |
| **मूल्यम्/मनोभावः** | प्रकृतिः परिपालनीया।<br>प्रकृतिसौन्दर्यं संरक्षणीयम्। |
| **पठनलक्ष्याणि** | पुष्पाणां जीवजालानां च नामानि वदति।<br>कवितां सतालम् आलपति।<br>चित्रं वर्णलेपनेन सुन्दरं करोति।<br>चित्राणि निरीक्ष्य नामानि वदति।<br>चित्राणि निरीक्ष्य आशयं वदति।<br>पुल्लिङ्गशब्दान् वदति लिखति च। |
| **पठनक्षमता** | प्रकृतिसौन्दर्यम् आस्वदते।<br>आलपनसामर्थ्यमार्जयति।<br>आशयं स्वांशीकरोति।<br>समानाशययुक्ताः कविताः सञ्चिनोति। |
| **कालांशः** | १४ |
| **पाठस्य आमुखम्** | प्रकृतिः वैविध्यपूर्णा भवति। तत्र वृक्षलतादयः पक्षिमृगादयः मानवाश्च पारस्पर्येण जीवन्ति। |

**प्रवेशकप्रवर्तनम्**

प्रकृतिसौन्दर्यवर्णनात्मकानि गीतानि प्रदर्शयति। तानि वीक्ष्य लघुचर्चां प्रचालयति।

- कानि कानि दृश्यानि पश्यन्ति?
- दृश्यस्य प्रमेयः कः?

- गृहं परितः एतादृशानि मनोहराणि दृश्यानि सन्ति वा? वदतु।

### पाठापग्रथनम्

मृदुला सख्याः गृहमागतवती। तदानीं सखी गृहं ,परिसरं, जीवजालानि च अधिकृत्य वर्णयति।

मृदुले, एतं मम सुन्दरं निलयं पश्यतु। अहं, माता, तातः, सोदरौ इति पञ्चजनाः अत्र निवसामः। मामकम् उद्यानं पश्यतु। तत्र अशोकचम्पकमन्दाराणां कुसुमानि लसन्ति। पिकपोतः मधुरं गायति। केकिगणः रुचिरं नृत्यति। काकाः हंसाः कीरकपोताः च नीडानि रचयन्ति। शशकः कुहरे निवसति। शुनकः मार्जारः च गृहे निवसति। सखि, इह वयं सर्वे सन्ततं सामोदं निवसामः।

### चित्राणां विशदीकरणम्

चित्रे कस्यचन गृहस्य परिसरः दृश्यते। गृहं परितः बहवः वृक्षाः सन्ति। अशोकचम्पकादीनि पुष्पाणि विलसन्ति। माता स्वच्छतां करोति। पिता पुत्रश्च सस्यानि रोपयति। बालकः मार्जारं लालयति। वृक्षस्य शाखायां कोकिलः शुकः च वर्तते। सखी मृदुलां स्वगृहं जीवजालानि च प्रदर्श्य विवृणोति।

## पठनप्रवर्तनानि

### प्रवर्तनम् - १ पुष्पाणां जीवजालानां च नामानि वदति।

विद्यालयपरिसरं निरीक्षितुं छात्रान् निर्दिशति। तदनन्तरं यानि दृष्टवन्तः तानि वदन्ति। ततः तेषां चित्ररचनाय प्रेरयति (उद्ग्रथनसाध्यताः - इतरच्छात्राणां चित्रकलाध्यापकानां रक्षकर्तॄणां चित्रकाराणां च साहाय्येन)। चित्रे विद्यमानानां नामानि एकैकः वदति। ततः गृहपरिसरं निरीक्ष्य ततः पुष्पाणां जीवजालानां च नामानि वक्तुं निर्दिशति। तेषां संस्कृतनामानि अध्यापिका श्यामफलके लिखति वदति च। (लोके कलानां साध्यताः अनन्ताःभवन्ति। तासु चित्रकलायाः प्राधान्यं विशिष्टं भवति। तदर्थं छात्राणां सामर्थ्यवर्धनं करणीयमेव)। (विशेषश्रद्धार्हाणां छात्राणां कृते डिजिट्ल द्वारा चित्ररचनां कर्तुम् अवसरं प्रददाति। तथा चित्राणां प्रतिकृतीः प्रदाय वर्णलेपनं कर्तुम् अपि अवसरं प्रकल्पते।) परिसरे विद्यमानानां पक्षिमृगादीनां चित्राणि ICT द्वारा प्रदर्श्य संशोधनं करोति। अनेन छात्राणां स्वीयमूल्यनिर्णयाय परस्परमूल्यनिर्णयाय च अवसरं प्रददाति। ICT द्वारा

पक्षिमृगादीनां शब्दान् श्रावयित्वा तेषां नामानि कथयति। अध्यापिका मृगाणां नामानि कथयति तदा छात्राः तेषां चेष्टाः साभिनयम् अवतारयति

**मूल्यनिर्णयसूचकानि -** नामप्रत्यभिज्ञानम्, उच्चारणम्, अवतरणम् ।

पक्षिमृगादीनां चित्रसम्पुटं बालमासिकाः च दत्वा तत्र परिचितनामानि कथयति। अत्र अपरिचितानां पक्षिमृगादीनां नामानि अन्विष्यति। कक्ष्यायां छात्रैः विरचितानि चित्राणि उपयुज्य सम्पुटं निर्माति प्रकाशयति च।

**प्रवर्तनम् - २ कवितां सतालम् आलपति।**

कवितां व्यक्तिशः सङ्घशः च आलपितुं साहाय्यं करोति। छात्राः अवतारयन्ति। अन्ते ICT द्वारा कवितां श्रावयति।

**मूल्यनिर्णयः -** अक्षरस्फुटता, आशयावबोधः, उचितभावः, उचिततालः।

**प्रवर्तनम् - ३ चित्रं वर्णलेपनेन सुन्दरं करोति।**

प्रकृतिसौन्दर्यवर्णनात्मकं किमपि चित्रं दत्वा वर्णलेपनाय निर्दिशति। ततः पाठभागस्थचित्रस्य (पुटसंख्या - ११) भावनानुसारं वर्णलेपनं कर्तुं सूचयति।

**मूल्यनिर्णयसूचकानि -** उचितवर्णलेपनम्, पूर्णता, आकर्षणीयता।

**प्रवर्तनम् - ४ चित्राणि निरीक्ष्य नामानि वदति।**

पाठभागे विद्यमानानां जीवजालानां पुष्पाणां च नामानि चित्राणि च योजयितुं लघुपत्रिकाः ददाति। सङ्घशः क्रीडारूपेण योजनं कर्तुं शक्यते।

प्रथमसङ्घाय चित्राणि द्वितीयसङ्घाय नामानि च ददाति। प्रथमसङ्घात् एकः पुरतः आगत्य "शुकस्य चित्रं यदा प्रदर्शयति तदा द्वितीयसङ्घेन शीघ्रं शुकः इति लिखितं पत्रं प्रदर्शनीयम्। एवं नामान्तराण्यपि उपयुज्य क्रीडां प्रचालयति।

अनन्तरं पठनप्रवर्तने विद्यमानानि चित्राणि निरीक्ष्य नामानि योजयति।

**मूल्यनिर्णयसूचकानि -** निरीक्षणसामर्थ्यम्, पदबोधः, अक्षरशुद्धिः, आशयबोधः।

**प्रवर्तनम् - ५ चित्राणि निरीक्ष्य आशयं वदति।**

चित्राणि दृष्ट्वा आशयं वक्तुं प्रेरयति। लघुवाक्यानि उच्चैः वाचयति। अनन्तरं

चित्रपत्रिकां प्रदर्श्य आशयं वक्तुं निर्दिशति। ततः तस्याशयानुसारम् अभिनयाय प्रेरयति।

बालिका नृत्यति
गायकः गायति

एवं पाठभागस्थप्रवर्तने विद्यमानानि चित्राणि निरीक्ष्य आशयं वदति।

**मूल्यनिर्णयसूचकानि -** आशयावबोधः, निरीक्षणपाटवम्, अक्षरस्फुटता।

**प्रवर्तनम् - ६ पुल्लिङ्गशब्दान् वदति लिखति च।**

ICT द्वारा चित्राणि प्रदर्श्य एकवचन-द्विवचन-बहुवचनरूपाणि परिशीलयति। टिप्पणीपुस्तके चित्ररचनाय निर्दिशति। यथा – गजौ, बालकाः, काकः, वानरौ, इत्यादीनि पादानि भित्तिपत्रिकायां लिखित्वा प्रदर्शयति। ततः छात्राः पदानुसारं चित्राणि रचयन्ति।

**मूल्यनिर्णयसूचकानि -** आशयावबोधः, अक्षरस्फुटता।

अध्यापिका पुल्लिङ्गशब्दानाम् एकवचन-द्विवचन-बहुवचनरूपाणां चित्राणि वीक्ष्य नामानि वदति। ततः श्यामफलके लिखति। छात्राः तस्य वाचनं कुर्वन्ति। अध्यापिका किमपि उदाहरणं लिखित्वा प्रदर्शयति। यथा - पिकः पिकौ पिकाः ।

तदनु उदाहरणान्तरं दत्वा छात्रान् लेखितुं निर्दिशति। पुल्लिङ्ग-एकवचन-द्विवचन-बहुवचनशब्दयुक्तानि कागदखण्डानि निर्मीय गणेभ्यः ददाति। अध्यापिकायाः सूचनानुसारं तानि यथावचनं क्रमीकरोति।

**मूल्यनिर्णयसूचकानि -** आशयावबोधः, लेखनशुद्धिः।

**प्रवर्तनम् - ७ कवितासम्पुटं निर्मोति।**

प्रकृतिसौन्दर्यवर्णनात्मिकाः कविताः भाषान्तरेभ्यः सञ्चित्य सम्पुटं निर्मातुं निर्दिशति।

**मूल्यनिर्णयसूचकानि -** आकर्षणीयता, उचितचयनम्।

## अग्रिमपाठसंयोजकं प्रवर्तनम्

बिन्दून् योजयित्वा चित्रस्य वर्णलेपनं करोति। चित्रे के के जन्तवः सन्तीति पृच्छति। वनेऽपि बहवः जन्तवः वर्तन्ते। तेषां कथामधिकृत्य द्वितीयः पाठः इति सूचयति।

### अनुबन्धः

**നാളേയ്ക്കുവേണ്ടി**

ഒരു തൈ നടാം നമുക്കമ്മയ്ക്കുവേണ്ടി
ഒരു തൈ നടാം കൊച്ചുമക്കൾക്കുവേണ്ടി
ഒരു തൈ നടാം നൂറുകിളികൾക്കുവേണ്ടി
ഒരു തൈ നടാം നല്ലനാളേയ്ക്കുവേണ്ടി
ഇത് പ്രാണവായുവിനായി നടുന്നു
ഇത് മഴയ്ക്കായി തൊഴുതുനടുന്നു
അഴകിനായ് തണലിനായ് തേൻപഴങ്ങൾക്കായ്
ഒരുനൂറുതൈകൾ നിറഞ്ഞുനടുന്നു

സുഗതകുമാരി ടീച്ചർ

മഞ്ഞുവേണം മഴയും വേണം
വെയിലും വേണം ലാവും വേണം
ഇരുട്ടും വേണം പുലരീം വേണം
പൂവും വേണം പുഴുവും വേണം
വേണം വേണം ഞാനും പാരിന്

കുഞ്ഞുണ്ണിമാഷ്

### पठ् धातु लट् परस्मैपदी

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र.पु. | पठति | पठतः | पठन्ति |
| म.पु | पठसि | पठथः | पठथ |
| उ.पु. | पठामि | पठावः | पठामः |

## द्वितीयः पाठः

# अवधानेन कर्तव्यम्

| | |
|---|---|
| **आशयः** | प्रकृतिः |
| **उपाशयः** | वनम् |
| **व्यवहाररूपम्** | चित्रकथा |
| **उद्देश्यानि/लक्ष्याणि** | वनसौन्दर्यं वैविध्यञ्च जानाति।<br>अवधानेनैव कर्म करणीयम् इति प्रत्यभिजानाति। |
| **मूल्यम्/मनोभावः** | वनसौन्दर्यं विभवश्च परिपालनीयम् ।<br>कथाश्रवणाय कथनाय च तात्पर्यम्। |
| **पठनलक्ष्याणि** | कथायाः आशयं वदति।<br>उचितवर्णलेपनं करोति।<br>साभिनयं कथां प्रस्तौति।<br>जीवजालानां नामानि वदति लिखति च।<br>नूतनपदानाम् अर्थं लिखति।<br>लट्लकारस्य प्रथमपुरुषस्य एकवचनद्विवचनरूपाणि विविच्य लिखति। |
| **पठनक्षमता** | आशयं स्वांशीकरोति।<br>समानाशययुक्ताः कथाः सञ्चिनोति।<br>कथां सम्भाषणरूपेण प्रस्तौति। |
| **कालांशाः** | १४ |
| **पाठस्यामुखम्** | बहूनां जन्तुजालानां वृक्षलतादीनां निकेतनमस्ति वनम्।<br>अतिमनोहरदृश्ययुक्ते वने प्रवृत्तां कथां पठामः। |

### प्रवेशकप्रवर्तनम्

Cartoon कथापात्राणां चित्राणि प्रदर्श्य तेषां नामानि वदतु इति कथयति। केचन सिम्बा, पूप्पी, बुजि, काट्टिले कण्णन्, कात्तू इत्यादीनि Cartoon नामानि वदन्ति। केचन सिंहः, शुनकः, वानरः, गजः, मार्जारः इति वदन्ति। एतादृशानां मित्राणां

वने प्रवृत्ता काचन कथा भवति 'अवधानेन कर्तव्यम्' इति।

## पाठापग्रथनम्

पञ्चतन्त्रात् स्वीकृता कथेयम्। वने प्रवृत्तायाः अस्याः कथायाः कथापात्रे भवतः सिंहः जम्बूकश्च। सम्यक् विचार्य एव सदा कर्तव्यमित्यस्ति अत्रत्य गुणपाठः।

## चित्राणां विशदीकरणम्

१. सिम्बा (सिंहः) २. पूप्पि (शुनकः) ३. काट्टिले कण्णन् (गजः) ४. बुजि (वानरः) ५. कात्तू (मार्जारः)

## पठनप्रवर्तनानि

### प्रवर्तनम् - १ कथायाः आशयं वदति।

छात्रान् गणान् कृत्वा क्रीडेयं चालयामः। प्रथमगणात् एकः पुरतः आगत्य एकं फलकं चिनोति। तत्र किं लिखितमिति उच्चैः वाचयति। तदा गणान्तरात् एकः फलके कं कथापात्रमधिकृत्य सूचयति इति वदति। तेन तस्य अभिनयमपि करोति। एवं गणद्वयेनापि फलकं चित्वा एतादृशं क्रीडां कर्तुं शक्यते।

सूचनाः

| फलकम् | | उत्तरम् |
|---|---|---|
| भक्षणमन्विष्य अटति | ➔ | सिंहः |
| किमपि न वदसि चेत् गुहान्तरं गच्छामि | ➔ | जम्बूकः |
| गुहायाः अन्तः प्रविशति | ➔ | सिंहः |
| उच्चैः गर्जति | ➔ | सिंहः |
| गर्जनं श्रुत्वा धावति | ➔ | जम्बूकः |

एवं सिंहजम्बूकयोः स्वभावसविशेषताः योजयितुं शक्यते।

**मूल्यनिर्णयसूचकानि -** आशयग्रहणम्, उचितयोजनम्।

**प्रवर्तनम् - २ उचितवर्णलेपनं करोति।**

चित्रे के के सन्तीति वदन्ति। तेषां संस्कृतनामानि वक्तुं साहाय्यं करोति। ततः उचितवर्णैः लेपयति।

**मूल्यनिर्णयसूचकानि -** उचितवर्णलेपनम्, आकर्षणीयता, निरीक्षणपाटवम्।

**प्रवर्तनम् - ३ साभिनयं कथां प्रस्तौति।**

परिचितकथानां कथनाय छात्रान् प्रेरयति। ततः साभिनयं पाठभागस्थकथाम् अवतारयितुं निर्दिशति।

**मूल्यनिर्णयसूचकानि -** आशयावबोधः, अवतारणशैली, अभिनयपाटवम्।

**प्रवर्तनम् - ४ जीवजालानां नामानि वदति लिखति च।**

अध्यापिका जीवजालानां नामयुक्तानि चित्राणि प्रदर्शयति। नामकथनमपि करोति। छात्राः उच्चैः पठन्ति। तदनु पक्षिमृगादीनां नामानि चित्रस्य अधः लेखितुं निर्दिशति। अध्यापिका यथाविधि संशोधयति। गृहे परिपालितानां जीविनां तथा वन्यजीविनां च चित्रं सञ्चित्य सम्पुटं निर्मातुं निर्दिशति। तेषां नामानि लेखितुं साहाय्यं ददाति।

**मूल्यनिर्णयसूचकानि -** आशयावबोधः, उचितपदलेखनम्, आकर्षणीयता, पूर्णता।

**प्रवर्तनम् - ५ नूतनपदानाम् अर्थं लिखति।**

अध्यापिका पाठभागस्थानि नूतनपदानि चित्वा टिप्पणिपुस्तके लेखितुं निर्दिशति। अनन्तरं पदकोशं निरीक्ष्य अर्थचयनाय साहाय्यं करोति।

**प्रवर्तनम् - ६ लट्लकारस्य प्रथमपुरुषस्य एकवचनद्विवचनरूपाणि विविच्य लिखति।**

क्रियापदानां परिचायनाय एकम् अभिनयगीतं परिचिनोति।

यथा – बालकः गच्छति ... तक तक तक ता...

बालकः धावति ... तक तक तक ता...

बालकः पठति .... क ख ग घ ङ

बालकः लिखति ... च छ ज झ ञ

बालकः नृत्यति ... ट ठ ड ढ ण

बालकः गायति ... त थ द ध न

बालकः धावति .... प फ ब भ म

अध्यापिका द्वित्रान् छात्रान् आह्वयति। ते अभिनयं कुर्वन्ति।

अनन्तरं पुल्लिङ्गद्विवचनम्, लट्लकारस्य द्विवचनरूपाणि च उपयुज्य गीतं गायति।

बालकौ गच्छतः तक तक तक ता...

बालकौ धावतः तक तक तक ता...

पुनः एकमाहूय बालकः गच्छति .. तक तक तक ता...

छात्रद्वयमाहूय बालकौ गच्छतः तक तक तक ता...

अन्ते क्रीडारूपेण एवं कर्तुं शक्यते।

ततः चित्रानुसारं कोष्ठकात् उचितक्रियापदानि योजयति।

**मूल्यनिर्णयसूचकानि** - आशयग्रहणम्, क्रियाबोधः, उचितयोजनम्।

**प्रवर्तनम् - ७**

संस्कृते बहवः ग्रन्थाः सन्ति। ते लोके प्रसिद्धाः भवन्ति। तादृशानां ग्रन्थानां कर्तृणां च नामानि आकर्षणीयतया लिखित्वा भित्तिपत्रिकायां प्रदर्शयति। तं वाचयति।

| ग्रन्थः | कर्ता |
|---|---|
| पञ्चतन्त्रम् | विष्णुशर्मा |
| रामायणम् | वाल्मीकिः |
| महाभारतम् | वेदव्यासः |
| रघुवंशः | कालिदासः |

प्रश्नोत्तरकेलीं सञ्चालयति ।

पञ्चतन्त्रस्य कर्ता कः?

आदिकाव्यं किम्?

रामायणस्य कर्ता कः?

महाभारतं केन विरचितम्?

आदिकविः कः?

रघुवंशस्य कर्ता कः?

अध्यापिका क्रीडाम् एकां कुर्मः इत्युक्त्वा छात्रान् सङ्घद्वयं करोति। प्रथमसङ्घाय स्फोरकपत्रे ग्रन्थानां नामानि विलिख्य ददाति । छात्राः तानि प्रदर्श्य तिष्ठन्ति । द्वितीयसङ्घाय एकां पेटिकां ददाति। तस्यां पेटिकायां ग्रन्थकर्तॄणां नामयुक्तानि स्फोरकपत्राणि सन्ति। यदा अध्यापिका सूचनां ददाति तदा द्वितीयसङ्घात् एकः पेटिकातः स्फोरकपत्रं प्रदर्श्य पठति। तदा प्रथमसङ्घात् अनुयोज्यस्फोरकपत्रं गृहीत्वा कथयति। एवं क्रीडा अनुवर्तते।

## अग्रिमपाठसंयोजकं प्रवर्तनम्

इन्द्रचापं दृष्टवन्तः वा इति पृच्छति। बिन्दून् योजयित्वा चित्रं पूर्तीकरोति। वर्णलेपनम् अपि करोति।

## अनुबन्धः

### पञ्चतन्त्रम्

कश्चन कथाग्रन्थः भवति पञ्चतन्त्रम्। अस्य कर्ता विष्णुशर्मा। पञ्चतन्त्रे गद्यं पद्यं चापि अस्ति। ग्रन्थेऽस्मिन् पञ्चतन्त्राणि सन्ति। तानि मित्रलाभः, मित्रभेदः, काकोलूकीयम्, लब्धप्रणाशः, अपरीक्षितकारकं च भवन्ति। संस्कृतभाषया लिखितोऽयं ग्रन्थः। बालसाहित्ये ग्रन्थस्यास्य प्रभावः अधिकः भवति।

# तृतीयः पाठः

# वर्षाचित्रम्

| | |
|---|---|
| **आशयः** | प्रकृतिः |
| **उपाशयः** | कालावस्था (वृष्टिः) |
| **व्यवहाररूपम्** | लघुविवरणम् |
| **उद्देश्यानि/ लक्ष्याणि** | प्रकृतेः विविधभावान् परिचिनोति। वर्षाकालसौन्दर्यम् आस्वदते। जलसंरक्षणस्य आवश्यकतां प्रत्यभिजानाति। |
| **मूल्यम्/मनोभावः** | जलाशयाः संरक्षणीयाः।<br>जलस्य उपयोगे मितत्वं पालनीयम्।<br>वर्षाकालसौन्दर्यास्वादने तात्पर्यम्। |
| **पठनलक्ष्याणि** | चित्रसम्पुटं रचयति।<br>प्रकृतिसंरक्षणम् अधिकृत्य वदति।<br>भित्तिपत्रिकां रचयति।<br>ऋतूनां नामानि वदति लिखति च।<br>लट् रूपाणि वदति लिखति च। |
| **पठनक्षमता** | वर्षाकालसौन्दर्यम् आस्वदते।<br>आशयं स्वांशीकृत्य नूतनसन्दर्भे प्रयुङ्क्ते।<br>चित्रसम्पुटनिर्माणे सामर्थ्यमार्जयति।<br>ऋतूनां नामानि अवगच्छति वदति च।<br>लट् रूपाणि वदति लिखति च। |
| **कालांशः** | १३ |

### पाठस्यामुखम्

प्रकृतिः अस्माकं जीवदायिनी। यद् यदावश्यकं तत् तत् सर्वं सा ददाति। तस्याः भावः तदा तदा परिवर्तते। प्रकृतौ कदाचित् शैत्यं भवति, कदाचित् उष्णम् अनुभवति, कदाचित् वृष्टिरपि भवति। वर्षाकाले प्रकृतेः अवस्थाम् आस्वदामहे।

### प्रवेशकप्रवर्तनम्

वृक्षान् गृहाणि च प्रदर्श्य अध्यापिका अभिनयगीतं गायति। छात्राः अपि साङ्घम् अनुगायन्ति। ततः लघुप्रश्नान् पृच्छति।

के वर्षन्ति? मेघाः वर्षन्ति।

मेघाः कदा आधिक्येन वर्षन्ति? वर्षाकाले।

### पाठापग्रथनम्

प्रकृतेः वर्षासौन्दर्यवर्णनात्मकं लघुविवरणमिदम्। वर्षाकाले प्रकृतेः अवस्थाम् अत्र प्रतिपादयति। तदा अन्तरिक्षं मेघावृतं भवति। इदं दृष्ट्वा मयूराःआमोदेन नृत्यन्ति। सर्वत्र वृष्टिः भवति। भेकाः अपि सन्तोषेण क्रों क्रोम् इति क्रोशन्ति। प्रकृतौ विद्यमानानि सर्वाणि क्लिन्नानि भवन्ति। बालाः वृष्टौ सहर्षं क्रीडन्ति। जलाशयाः सर्वत्र पूर्णाः दृश्यन्ते। अत एव कृषकाः सन्तोषेण कृषिं कुर्वन्ति। समयेऽस्मिन् प्रकृतिः आर्द्रा हरिताभा च भवति।

### चित्राणां विशदीकरणम्

वर्षाकालस्य प्रकृतेः चित्रीकरणमेवात्र दृश्यते। मेघाः वर्षन्ति। पूर्णं जलाशयं द्रष्टुं शक्यते। तत्र बालकाः क्रीडन्ति। कृषकः केदारे वृषभाभ्यां कर्षति। समीपे गृहाणि वृक्षाः पर्वतः मेघाः च वर्तन्ते। वृष्टौ बालकः पर्णं स्वीकृत्य अटति। उपजलाशयं भेकः वर्तते।

## पठनप्रवर्तनानि

### प्रवर्तनम् - १ चित्रसम्पुटं रचयति।

वर्षाकालस्य मनोहरदृश्यानि ICT द्वारा प्रदर्शयति। ततः एतादृशानां चित्राणां सञ्चयं कृत्वा चित्रसम्पुटं रचयितुं निर्दिशति।

**मूल्यनिर्णयसूचकानि -** उचितचित्रसन्निवेशनम्, आकर्षणीयता।

वर्षाकालवर्णनायुक्तानि गीतानि लेखनानि वा भाषान्तरेभ्यः सञ्चित्य सम्पुटं निर्मातुं निर्दिशति।

### प्रवर्तनम् - २ प्रकृतिसंरक्षणम् अधिकृत्य वदति।

प्रकृतिदुरन्ताणां चित्राणि प्रदर्श्य अथवा Video प्रदर्श्य तस्य कष्टताम् अधिकृत्य

विशदीकरोति। तदनु प्रकृतिसंरक्षणस्य आवश्यकताम् अधिकृत्य चर्चां करोति। लघुटिप्पणीं लिखति। (पुटसंख्या ३७) अवतारयति।

मातृका-

प्रकृतिः अस्माकं माता। सा संरक्षणीया। प्रकृतिसंरक्षणाय वृक्षरोपणं करणीयम्। प्रकृतिविभवानां मितोपयोगः करणीयः। प्रकृतिमलिनीकरणं निवारणीयम्। पलास्तिकवस्तूनि यथायोग्यं संस्करणीयानि। प्रकृतिचूषणं कदापि न करणीयम्।

**मूल्यनिर्णयसूचकानि -** आशयावबोधः, अवतारणशैली, भागभागित्वम्, वाक्यघटना।

**प्रवर्तनम् - ३ भित्तिपत्रिकां रचयति।**

मातृभाषायां विद्यमानाः भित्तिपत्रिकाः प्रदर्श्य तदधिकृत्य चर्चां नयति। ततः प्रदत्तां भित्तिपत्रिकां पूरयितुं छात्रान् निर्दिशति। टिप्पणीपुस्तके लेखितुं निर्दिशति च।

**मूल्यनिर्णयसूचकानि -** आकर्षकत्वम्, आशयस्पष्टता, अक्षरशुद्धिः।

**प्रवर्तनम् - ४ ऋतूनां नामानि वदति लिखति च।**

ऋतूनां विषये चित्राणि Video Clips वा प्रदर्श्य तान् अधिकृत्य विवरणं ददाति। तदनन्तरं तेषां नामानि अनुबन्धस्य (पुटसंख्या ४१) साहाय्येन लेखितुं निर्दिशति। भित्तिपत्रिकां लिखित्वा प्रदर्शयितुं निर्दिशति च।

ऋतूनां नामानि कागदखण्डेषु विलिख्य गणेभ्यः यच्छति। तानि यथाक्रमं क्रमीकर्तुं निर्दिशति।

**मूल्यनिर्णयसूचकानि -** आशयावगमनम्, यथाक्रमलेखनम्।

ऋतूनां नामानि कागदखण्डेषु विलिख्य तेषां चित्राणि च गणेषु वितरति। ऋतूनां नामानि यदा अध्यापिका वदति तदा तन्नामयुक्तं पत्रं तदाशययुक्तं चित्रं च छात्राः प्रदर्शयन्ति। ततः ऋतूनां नामानि उच्चैः पठन्ति।

**प्रवर्तनम् - ५ लट्रूपाणि वदति लिखति च।**

अध्यापिका एकस्य बालकस्य चित्रं प्रदर्श्य बालः इति वदति। अनन्तरं बालकानां चित्रं प्रदर्श्य बालाः इति परिचाययति। अनन्तरं बालः किं किं करोति इति पृष्ट्वा

बालः क्रीडति, बालः गायति, बालः ......, इति कथयति। तदनु बालाः किं किं कुर्वन्ति इति पृष्ट्वा बालाः क्रीडन्ति, बालाः गायन्ति, बालाः ...... इति वदति। एवं भिन्न चित्राणि उपयुज्य अभ्यासं कर्तुं शक्नोति। अनन्तरम् अध्यापिका लट्लकारस्य एकवचनबहुवचनरूपाणि भित्तिपत्रिकायां विलिख्य प्रदर्शयति।

| **एकवचनम्** | **बहुवचनम्** |
|---|---|
| भवति | भवन्ति |
| क्रीडति | क्रीडन्ति |
| कर्षति | कर्षन्ति |
| नृत्यति | नृत्यन्ति |
| क्रोशति | क्रोशन्ति |
| पठति | पठन्ति |
| गायति | गायन्ति |
| गच्छति | गच्छन्ति |
| चलति | चलन्ति |

पाठभागस्थां पट्टिकां पूरयितुं निर्दिशति।

**मूल्यनिर्णयसूचकानि** - आशयावगमनम्, अक्षरशुद्धिः, उचितपूरणम्।

पदक्रीडा - कागदखण्डेषु नामपदानि क्रियापदानि च विलिख्य गणेषु वितरति। यः गणः प्रथमतया वाक्यनिर्माणं करोति सः गणः विजयं प्राप्नोति।

**प्रवर्तनम् - ६**

अध्यापिका पाठं सम्यक् पठितुं निर्दिशति। ततः पादटिप्पणिं लेखितुं सूचयति।

**अग्रिमपाठसंयोजकं प्रवर्तनम्**

कविताम् (पुटसंख्या ४२) audio द्वारा श्रावयति। तस्याः आशयं वदति। तादृशाशयप्रतिपादकं भवति अग्रिमपाठम् इति बोधयति।

## एककम् - २

# सार्थकं जीवनम्।

जीवने धार्मिकमूल्यानां महत्तरं स्थानमस्ति। एतानि मूल्यानि जीवने परिपालनीयानि एव। अहिंसा परमो धर्मः , वसुधैव कुटुम्बकम् इत्यादीनां सार्वकालीनदर्शनानां प्रभवस्थानं भारतमेव। लोकाः सर्वे एकत्वभावनया ससुखं जीवेयुः इति दर्शनं मानविकतायाः औन्नत्यं प्रदर्शयति। स्नेहस्त्यागमैत्र्यादीनां मूल्यानां समुद्धरणाय योग्याः त्रयः पाठाः अत्र समायोजिताः। एते क्रमशः सौहार्दकुसुमानि, सर्वे भवन्तु सुखिनः, अभयदा माता इति।

# चतुर्थः पाठः

# सौहार्दकुसुमानि

| | |
|---|---|
| **आशयः** | मानविकता |
| **उपाशयः** | मैत्री |
| **व्यवहाररूपम्** | सुभाषितम् |
| **उद्देश्यानि/लक्ष्याणि** | जीवने मानविकमूल्यानां प्रसक्तिम् अवगच्छति।<br>मैत्र्याः आवश्यकताम् अनिवार्यताञ्च प्रत्यभिजानाति। |
| **मूल्यम्/मनोभावः** | स्वजीवने मैत्री परिपालनीया। |
| **पठनलक्ष्याणि** | सुभाषितं सतालम् आलपति।<br>नूतनपदानाम् अर्थं लिखति।<br>आशययुक्तानि सुभाषितानि लिखति।<br>सुभाषितसम्पुटं रचयति।<br>सुभाषितानाम् आशयं वदति।<br>अकारान्तनपुंसकलिङ्गशब्दान् लिखति। |
| **पठनक्षमता** | आशयं स्वांशीकरोति।<br>समानाशययुक्तानि सुभाषितानि सञ्चिनोति।<br>आलपनसामर्थ्यमार्जयति। |
| **कालांशाः** | १३ |

## पाठस्यामुखम्

मानवजीवनं मूल्याधिष्ठितं भवति। धार्मिकमूल्येषु मैत्री सुप्रधानस्थानमावहति। एतदाशयप्रतिपादकानि त्रीणि सुभाषितानि पाठेऽस्मिन् सन्निवेशितानि।

## प्रवेशकप्रवर्तनम्

सत्यमेव जयते, सत्यं शिवं सुन्दरम्, यतो धर्मस्ततो जयः इत्यादीनि ध्येयवाक्यानि प्रसिद्धानि भवन्ति। एतानि जीवनस्य आधारभूतानि तत्त्वान्येव प्रतिपादयन्ति। एवं स्नेहः त्यागः, दया, परोपकारः, मैत्री प्रभृतीनि मूल्यान्यधिकृत्य बहूनि सुभाषितान्यपि

संस्कृते सन्ति। तेषु त्रीणि पठामः इत्युक्त्वा पाठभागं परिचाययति।

### पाठापग्रथनम्

सौहार्दस्य महत्त्वप्रतिपदकानि भवन्ति पाठभागस्थानि त्रीणि सुभाषितानि। कीदृशं मित्रं वर्जयेत्, उत्तममित्रस्य सविशेषताः, मैत्र्याः प्राधान्यम् इत्यादयः आशयाः समायोजिताः।

### चित्राणां विशदीकरणं

भारतस्य देशीयमुद्रा। सर्वोच्चतमन्यायालयस्य मुद्रा। कोणार्क् सूर्यमन्दिरे विद्यमानं प्रसिद्धं शिलाचक्रशिल्पम्।

## पठनप्रवर्तनानि

### प्रवर्तनम् - १ सुभाषितं सतालम् आलपति।

एकैकः सौहृदस्य सन्देशद्योतकाः कविताः आलपति। अनन्तरं पाठभागस्थानि सुभाषितानि सतालम् आलपति।

### प्रवर्तनम् - २ नूतनपदानाम् अर्थं लिखति।

अध्यापिका पाठभागस्थानि नूतनपदानि चित्वा टिप्पणिपुस्तके लेखितुं निर्दिशति। अनन्तरं पदकोशं निरीक्ष्य अर्थचयनाय साहाय्यं करोति।

### प्रवर्तनम् -३ आशययुक्तानि सुभाषितानि लिखति।

अधोदत्तम् आशयं पठित्वा उचितं सुभाषितं चित्वा लिखति।

विद्यया विनयं लभते।

विनयात् पात्रतां प्राप्नोति।

| | |
|---|---|
| विद्या ददाति विनयम् | दानं भोगो नाशस्तिस्रो |
| विनयाद्याति पात्रताम्। | गतयो भवन्ति वित्तस्य। |
| पात्रत्वाद्धनमाप्नोति | यो न ददाति न भुङ्क्ते |
| धनाद्धर्मः ततस्सुखम्॥ | तस्य तृतीया गतिर्भवति ॥ |

एवं पाठभागस्थवाक्यानि (पुटसंख्या - ४७) पठित्वा सुभाषितानि लिखति ।

**मूल्यनिर्णयसूचकानि -** आशयग्रहणम्, सुभाषितचयनम्, अक्षरव्यक्तता।

**प्रवर्तनम् - ४ सुभाषितसम्पुटं रचयति।**

रामपुरत्तुवार्यर् महोदयस्य कुचेलवृत्तं वञ्चिप्पाट्ट प्रसिद्धं भवति। तत्र कुचेल-श्रीकृष्णयोः मिथः सौहृदः हृदयस्पर्शी भवति। मैत्री इति आशयः अतिगम्भिरतया अस्यां कवितायां स्पष्टीकृतः। एतादृशाः कविताः विविधभाषाभ्यः सञ्चित्य सम्पुटं रचयति। एकैकः सौहृदस्य सन्देशद्योतकाः कविताः आलपति। (उद्ग्रथनसाध्यताः - सौहृदसम्बन्धाः कथाः भाषान्तरेभ्यः सञ्चित्य सम्पुटं निर्माति)

**मूल्यनिर्णयसूचकानि -** उचितसुभाषितचयनम्, आकर्षणीयता, अक्षरशुद्धिः।

**प्रवर्तनम् - ५ सुभाषितानाम् आशयं वदति।**

सुभाषितानि सस्वरं वाचयति। छात्राः अध्यापकस्य साहाय्येन आशयं ललितवाक्यैः वदन्ति। कीदृशं मित्रं वर्जयेत्? परोक्षे कार्यहन्तारम्, प्रत्यक्षे प्रियवादिनम् ..... एवं सरलप्रश्नैः उत्तरैः च सुभाषितानाम् आशयं वक्तुम् अध्यापिका प्रेरयति। छात्राः लघुवाक्यैः सुभाषितस्य आशयं वदन्ति।

**मूल्यनिर्णयसूचकानि -** आशयबोधः, उचितमुत्तरम्, वाक्यशुद्धिः।

**प्रवर्तनम् - ६ अकारान्तनपुंसकलिङ्गशब्दान् लिखति।**

नपुंसकलिङ्गस्य एकवचन-द्विवचन-बहुवचनरूपाणां दृश्यानि ICT द्वारा प्रदर्शयति। अनन्तरम् छात्राः उच्चैः पठन्ति।

**अग्रिमपाठसंयोजकं प्रवर्तनम्**

विविधवर्णयुक्तानां पुष्पाणां चित्राणि प्रदर्शयति। एतानि कुत्र विलसन्ति? इति अध्यापिका पृच्छति। भवतः गृहे उद्यानम् अस्ति वा? तस्य परिपालनाय किं किं करोति? इति च पृच्छति। वृक्षलतादीन् पक्षिमृगादीन् च स्निह्यन्ती काचन बालिका कथं चिन्तयति इति अग्रिमपाठे पश्यामः इति सूचनां ददाति।

## अनुबन्धः

| ध्येयवाक्यम् | संस्था |
|---|---|
| सत्यं शिवं सुन्दरम् | दूरदर्शनम् |
| बहुजनहिताय बहुजनसुखाय | आकाशवाणी |
| योगक्षेमं वहाम्यहम् | LIC |
| सत्यमेव जयते | भरतसर्वकारः |
| यतो धर्मस्ततो जयः | सर्वोच्चतमन्यायालयः |
| नभस्पृशं दीप्तम् | वायुसेना |
| शं नो वरुणः | जलसेना |
| धर्मचक्रप्रवर्तनाय | लोकसभा |
| मृदुभावे दृढकृत्ये | केरल आरक्षक विभागः |
| कर्मणि व्यज्यते प्रज्ञा | केरल सर्वकलाशाला |

**पञ्चमः पाठः**

# सर्वे भवन्तु सुखिनः

| | |
|---|---|
| **आशयः** | मानविकता |
| **उपाशयः** | सहवर्तित्वम्, आर्द्रता, स्नेहः |
| **व्यवहाररूपम्** | सम्भाषणम् |
| **उद्देश्यानि/लक्ष्याणि** | जीवने सहजीविस्नेहस्य महत्वम् अवगच्छति।<br>सहवर्तित्वस्य आवश्यकतां प्रत्यभिजानाति।<br>सम्भाषणं कर्तुं तात्पर्योत्पादनम्। |
| **मूल्यम्/मनोभावः** | जीवने सहजीविस्नेहः पालनीयः।<br>सहजीविस्नेहेन आनन्दम् अनुभवति। |
| **पठनलक्ष्याणि** | सम्भाषणं साभिनयम् अवतारयति।<br>नूतनपदानाम् अर्थं लिखति।<br>सहजीविस्नेहस्य आवश्यकतां जानाति वदति च।<br>सम्बोधनरूपाणि वदति लिखति च।<br>आचारोपचारशब्दान् चित्वा लिखति।<br>लोट् रूपाणि वदति लिखति च। |
| **पठनक्षमता** | सम्भाषणसामर्थ्यम् आर्जयति।<br>सहजीविस्नेहः करणीयः इति ज्ञानमार्जयति।<br>आचारोपचारशब्दान् अवगच्छति प्रयुङ्क्ते च।<br>सम्बोधनरूपाणि अवगच्छति प्रयुङ्क्ते च।<br>लोट्रूपाणि प्रयुङ्क्ते। |
| **कालांशाः** | १३ |

## पाठस्यामुखम्

भारतसंस्कृतेः वैशिष्ट्यं भवति विश्वमानविकता। 'वसुधैव कुटुम्बकम्', 'यत्र विश्वं भवत्येकनीडम्', 'लोकाः समस्ताः सुखिनो भवन्तु' इत्यादयः उदात्ताः विचाराः विश्वाय प्रदत्ताः भारतेन।

## प्रवेशकप्रवर्तनम्

सहजीविस्नेहप्रतिपादकम् एकं चित्रं प्रदर्श्य प्रश्नान् पृच्छति।?

अस्य प्रमेयः कः?

सहजीविस्नेहप्रतिपादकं सम्भाषणं पठामः।

## पाठापग्रथनम्

सहजीविस्नेहः अस्माकं संस्कृतिरेव। तादृशमनोभावयुक्ता एका बालिका भवति लता। सा पञ्चमकक्ष्यायां पठति। तस्याः गृहस्य पुरतः विद्यमाने वटवृक्षे बहवः पक्षिणः शाबकाश्च निवसन्ति। लता प्रतिदिनं तेभ्यः भक्षणं ददाति स्म। किन्तु एकस्मिन् दिने केचन वटवृक्षं कर्तयन्तीति ज्ञात्वा सा अतीवदुःखिता अभवत्। तदा सा संस्कृताध्यापकं स्मरति। कार्यमिदं अध्यापकाय निवेदयति। अध्यापकः तस्याः सहजीविस्नेहमनोभावम् अभिनन्द्य समस्यायाः परिहारं करिष्यामि इति तां समाश्वास्य प्रतिप्रेषयति।

## चित्राणां विशदीकरणम्

चित्रे एकं गृहं दृश्यते। तस्य पुरतः एकः वटवृक्षोऽस्ति। वृक्षे पक्षिणः शाबकाश्च सन्ति। तस्य अधः एका बालिका उपविशति। पक्षिणां कृते भक्षणं ददाति।

# पठनप्रवर्तनानि

## प्रवर्तनम् - १ सम्भाषणं साभिनयम् अवतारयति।

लघु-लघु सम्भाषणदृश्यानि ICT द्वारा प्रदर्शयति। तदनन्तरं छात्रान् गणान् कृत्वा पाठभागं सम्यक् पठित्वा सम्भाषणाय प्रेरयति।

## मूल्यनिर्णयसूचकानि

उचितम् अवतरणम्, आशयग्रहणम्, अक्षरस्फुटता।

## प्रवर्तनम् - २ नूतनपदानाम् अर्थं लिखति।

अध्यापिका पाठभागस्थानि नूतनपदानि चित्वा टिप्पणिपुस्तके लेखितुं निर्दिशति। अनन्तरं पदकोशं निरीक्ष्य अर्थचयनाय साहाय्यं करोति।

**प्रवर्तनम् - ३ सहजीविस्नेहस्य आवश्यकतां जानाति वदति च।**

सहजीविस्नेहप्रतिपादकाः कथाः, ह्रस्वचलच्चित्राणि वा प्रदर्श्य चर्चां नयति।

अत्र किं प्रतिपादयति?

सहजीविस्नेहस्य का आवश्यकता?

**मूल्यनिर्णयसूचकानि -** आशयग्रहणम्, भागभागित्वम्।

**प्रवर्तनम् - ४ सम्बोधनरूपाणि वदति लिखति च।**

अध्यापिका छात्राणां नामानि पृच्छति। तैरुक्तानि नामानि श्यामफलके लिखति। अनन्तरं सम्बोधनरूपपरिचायनाय एकैकं छात्रम् आहूय सम्भाषणं करोति।

यथा – हे विवेक! आगच्छ।

हे रम्ये ! इदं स्वीकरोतु।

हे राम ! रमेशम् आह्वय।

सम्भाषणानन्तरं श्यामफलके लिखितानां नाम्नां सम्बोधनरूपाणि लिखित्वा प्रदर्शयति। अनन्तरं पाठपुस्तकस्थानां सम्बोधनरूपाणां पट्टिकां व्यक्तिशः पूरयितुं निर्दिशति।

**मूल्यनिर्णयसूचकानि -** आशयावगमनम्, उचितं पूरणम्, अक्षरशुद्धिः।

बालः – हे बाल!
महोदयः – हे महोदय!
छात्रः – हे छात्र!
लता – हे लते!
बालिका – हे बालिके!
वत्सा – हे वत्से!
सुमा – हे सुमे!

**प्रवर्तनम् - ५ आचारोपचारशब्दान् चित्वा लिखति।**

पेटिकातः पदानि स्वीकृत्य आचारोपचारशब्दान् सम्बोधनशब्दान् च विविच्य लिखतु। अध्यापिका आचारोपचारशब्दान् तेषाम् अर्थाञ्च कागदखण्डेषु विलिख्य

गणेषु वितरति। यः गणः प्रथमतया तान् यथोचितं योजयति तं गणम् अभिनन्दति।

पदानि यथा –

| | | |
|---|---|---|
| नमस्ते | – | നമസ്കാരം |
| आगच्छतु | – | വരൂ |
| उपविशतु | – | ഇരിക്കൂ |
| कुशलं वा | – | സുഖമല്ലേ |
| सुप्रभातम् | – | സുപ്രഭാതം |
| शुभरात्रिः | - | ശുഭരാത്രി |
| क्षम्यताम् | – | ക്ഷമിച്ചാലും |
| धन्यवादः | – | നന്ദി |
| चिन्ता मास्तु | – | സാരമില്ല |
| अभिनन्दनानि | – | അഭിനന്ദങ്ങൾ |
| पुनर्मिलामः | – | വീണ്ടും കാണാം |

एतानि टिप्पणीपुस्तके लिखित्वा स्थापयितुं निर्दिशति। तेषां स्वभावं विशदीकरोति। ततः प्रवर्तनमिदं व्यक्तिशः कर्तुं निर्दिशति।

**मूल्यनिर्णयसूचकानि -** उचितं पूरणम्, अक्षरशुद्धिः, आशयावगमनम्।

यथा –

| आचोरोपचारशब्दाः | सम्बोधनरूपाणि |
|---|---|
| नमस्ते | महोदय! |
| सुप्रभातम् | पुत्र! |
| धन्यवादः | मालविके! |
| पुनर्मिलावः | लतिके! |

**प्रवर्तनम् - ६ लोट् रूपाणि वदति लिखति च।**

सम्भाषणांशान् श्यामफलके लिखित्वा प्रदर्शयति। छात्रान् योजयित्वा सम्भाषमिदम् अवतारयति।

अध्यापिका - हे राजेश! किं करोषि?

राजेशः - अहं संस्कृतं पठामि।

अध्यापिका - आम्, सम्यक् **पठतु।**

हे लते, किं लिखसि?

लता - अहं संस्कृतं लिखामि।

अध्यापिका - उत्तमम्, श्रद्धया **लिखतु।**

एवम् अन्यानि क्रियापदानि उपयुज्य सम्भाषणरचनायै साहाय्यं करोति। तदनु पाठभागस्थं प्रवर्तनं कर्तुं निर्दिशति।

**मूल्यनिर्णयसूचकानि -** लकारज्ञानम्, उचितं पूरणम्, आशयबोधः

इतरभाषासु विद्यमानानि लेखनानि कथाश्च संगृह्य तान् पठितुं छात्रान् निर्दिशति।

**अग्रिमपाठसंयोजकं प्रवर्तनम्**

अध्यापिका प्रश्नान् पृच्छति। भवतः परिसरेषु विद्यमानानां समाजसेवकानां नामानि वदतु।

ते किं किं कृतवन्तः?

एतादृशीम् एकां महाभागाम् अग्रिमपाठे परिचिनुमः।

**अनुबन्धः**

**എന്റെ ഗുരുനാഥൻ**

ലോകമേ തറവാട്, തനിക്കീച്ചെടികളും
പുൽകളും പുഴുകളും കുടിതൻ കുടുംബക്കാർ
ത്യാഗമെന്നതേനേട്ടം, താഴ്മതാൻ അഭ്യുന്നതി
യോഗവിത്തേവ ജയിക്കുന്നിതെൻ ഗുരുനാഥൻ (വള്ളത്തോൾ)

## षष्ठः पाठः

# अभयदा माता

| | |
|---|---|
| **आशयः** | मानविकता |
| **उपाशयः** | अनुरूपीकरणम् |
| **व्यवहाररूपम्** | लघुविवरणम् |
| **उद्देश्याणि/लक्ष्याणि** | निरालम्बाः समुद्धरणीयाः इति अवगच्छति।<br>आश्रयहीनानां उन्नमनाय प्रयत्नं करोति।<br>सहजीविनः अस्मत्सदृशाः इति जनाति।<br>समाजोद्धारकान् अधिकृत्य अवगच्छति। |
| **मूल्यम्/मनोभावः** | निरालम्बानाम् उन्नमने तात्पर्यम्।<br>सहजीविषु अनुकम्पा। |
| **पठनलक्ष्याणि** | महात्मनां जीवनचरितम् अवगम्य वदति लिखति च।<br>महात्मनां चित्रसम्पुटं निर्माति।<br>षष्ठीविभक्तेः एकवचन-बहुवचनरूपाणि वदति लिखति च।<br>यदा-तदा उपयुज्य वाक्यानि लिखति।<br>लङ् रूपाणि लिखति। |
| **पठनक्षमता** | निराश्रयाणां कृते सहायमनस्कता।<br>सहजीविस्नेहाय सन्नद्धता। |
| **कालांशाः** | १२ |

### पाठस्य आमुखम्

समाजसेवने तथा आलम्बहीनानां समुद्धरणे च दत्तश्रद्धा आसीत् मदर् तेरेसा। अस्याः जीवनमधिकृत्यैव पाठोऽयम्।

### प्रवेशकप्रवर्तनम्

निरालम्बानां कानिचन चित्राणि प्रदर्शयति। एतेषां समुद्धरणार्थं स्वजीवितं समर्पितवन्तः महानुभावाः बहवः सन्ति। महाभागायाः चित्रं प्रदर्शयति। एषा का

इति पृच्छति। तास्वन्यतमा भवति मदर् तेरेसा।

### पाठापग्रथनम्

मदर् तेरेसा महाभागायाः भूतदयां, प्रवर्तनानि, पुरस्कारलब्धिं च अधिकृत्य पाठेऽस्मिन् विवृणोति।

### चित्राणां विशदीकरणम्

मदर् तेरेसायाः निरालम्बानां केषाञ्चन बालानां च चित्राणि।

## पठनप्रवर्तनानि

### प्रवर्तनम् - १ महात्मनां जीवनचरितम् अवगम्य वदति लिखति च।

ICT द्वारा वा भित्तिपत्रिकया वा अधो दत्तां पट्टिकां प्रदर्शयति। अनन्तरम् उदाहरणानुसारं लघुवाक्यानि वक्तुं लेखितुं च निर्दिशति।

| | | |
|---|---|---|
| **श्रीनारायणगुरुदेवः** | पिता | माटनाशान् |
| | जन्मस्थानम् | चेम्पषन्ति |
| | कृतिः | दैवदशकम् |
| | माता | कुट्टियम्मा |

यथा - श्रीनारायणगुरुदेव**स्य** पिता माटनाशान्।

एवं स्वामिविवेकानन्दः, महात्मागान्धिमहोदयः, जवहर् लाल् नेहरु महाशयः इत्यादीनां महात्मनां जीवनचरितं वक्तुं लेखितुं च निर्दिशति।

**मूल्यनिर्णयसूचकानि -** आशयावबोधः, अक्षरशुद्धिः, लेखनसामर्थ्यम्

### प्रवर्तनम् - २ महात्मनां चित्रसम्पुटं निर्माति।

नवोद्धाननायकानां चित्राणि प्रदर्शयति। तेषां नामानि वदति। ततः चित्राणि सञ्चित्य चित्रसम्पुटं निर्मातुं निर्दिशति।

राजाराम् मोहन् राय्, अय्यङ्कालि, चट्टम्पिस्वामी, आनिबसन्द्, श्रीनारायणगुरुः, महात्मागान्धी, सरोजिनि नायिडु, डा. बि आर् अम्बेद्कर, सर्दार् वल्लभाय् पट्टेल्

एवं महात्मनां चित्राणि सञ्चित्य चित्रसम्पुटं निर्माति।

**मूल्यनिर्णयसूचकानि -** उचितचित्रसन्निवेशनम्, आकर्षणीयता।

**प्रवर्तनम् - ३ यदा-तदा उपयुज्य वाक्यानि लिखति।**

घण्डानादं श्रृण्वन्ति। छात्राः कक्ष्यां प्रविशन्ति।

यदा घण्डानादं श्रृण्वन्ति तदा छात्राः कक्ष्यां प्रविशन्ति इति श्यामफलके अध्यापिका लिखति।

तदनु अध्यापिका छात्रान् संघान् करोति। प्रथमसंघाय यदा इति, द्वितीयसंघाय घण्डानादं श्रृण्वन्ति इति, तृतीयसंघाय छात्राः कक्ष्यां प्रविशन्ति इति, चतुर्थसंघाय तदा इति च विलिखितानि स्फोरकपत्राणि ददाति। अनन्तरं श्यामफलके लिखितक्रमानुसारं स्फोरकपत्राणि गृहीत्वा स्थातुं निर्दिशति। अधिकदृष्टान्तान् दत्वा पुनरपि एवं कर्तुं शक्नोति।

एवं पाठभागस्थं प्रवर्तनमपि कर्तुं निर्दिशति।

**मूल्यनिर्णयसूचकानि -** अक्षरशुद्धिः, उचितपदयोजनम्।

**प्रवर्तनम् - ४ षष्ठीविभक्तेः एकवचन-बहुवचनरूपाणि वदति लिखति च।**

छात्रस्य – छात्राणाम्

अनाथस्य – अनाथानाम्

एतानि वाक्यानि अध्यापिका श्यामफलके लिखति। वर्णान्तरेण बृहदक्षरैश्च वा तत्रत्य परिवर्तनस्य सूचनां स्पष्टयति। अध्यापिका उच्चैः वाचयति। छात्राः अनुवदन्ति। टिप्पणिपुस्तके लेखितुं सूचयति। एवं पाठभागस्थं प्रवर्तनं कर्तुं निर्दिशति।

**मूल्यनिर्णयसूचकानि -** आशयग्रहणम्, अक्षरशुद्धिः।

**प्रवर्तनम् - ५ लङ् रूपाणि लिखति।**

अपठत् अपठताम् अपठन् एवं विलिख्य प्रदर्शयति।

'अपठ' इति लिखितं फलकं छात्राय ददाति। अनन्तरं 'त्' 'ताम्' 'न्' इति लिखति।

फलकानि अपि यच्छति। अपठत्, अपठताम्, अपठन् इति योजयितुं निर्दिशति। एवं अलिख, अगच्छ, अभव इत्यादीनि फलकानि दत्वा पदपूर्तीकरणाय साहाय्यं ददाति।

**अग्रिमपाठसंयोजकं प्रवर्तनम्**

भवतः इष्टतमं भोज्यं किम्?

स्वास्थ्याय भक्षणम् अत्यन्तम् अपेक्षितं वा? भवताम् अभिप्रायः कः? इत्यादीन् प्रश्नान् पृष्ट्वा चर्चायै निर्दिशति।

## अनुबन्धः

### मदर् तेरेसा

मदर् तेरेसा प्रसिद्धा समाजसेविका भवति। महाशया यूगोस्लावियादेशे १९१० तमे वर्षे आगस्तमासस्य २७ तमे दिनाङ्के अजायत। अस्याः पिता निकोलास् बोजाक्सिया, माता ड्रेन फिल् बेक्किल् च भवति। एषा १९४९ तमे वर्षे नोबल् पुरस्कारं प्राप्तवती।१९९७ तमे वर्षे सेप्तम्बर् मासस्य पञ्चमे दिनाङ्के महाभागा दिवंगता।

# एककम् - ३

# स्वास्थ्यं जीवनम्

'अन्नं वै ब्रह्म', स्वस्थे शरीरे स्वस्थं मनः , शरीरमाद्यं खलु धर्मसाधनम् इत्यादीनि महद्वाक्यानि आरोग्यस्य प्राधान्यम् उद्घोषयति। आरोग्यजीवनं सर्वेषाम् आह्लादकरं भवति। आरोग्यसंरक्षणे भक्षणस्य व्यायामस्य च अत्यन्तं प्राधान्यमस्ति।रुचिमपेक्ष्य हिताहारस्यैव अधिका प्रसक्तिरस्ति। स्वास्थ्यजीवनाय मनसः शरीरस्य च आरोग्यम् अत्यन्तापेक्षितमेव। व्यायामोऽपि अवश्यं करणीय एव। तदर्थं क्रीडाः सहायकाः भवन्ति। स्वास्थ्यं जीवनम् इत्यस्मिन् एकके अन्नम् आरोग्याय, होक्की इति पाठद्वयं समायोजितं भवति।

## सप्तमः पाठः

# अन्नम् आरोग्याय

| | |
|---|---|
| **आशयः** | भक्षणम् आरोग्यम् च। |
| **उपाशयः** | भक्षणवैविध्यम् आरोग्यशीलानि च। |
| **व्यवहाररूपम्** | चित्रकथा |
| **उद्देश्यानि/लक्ष्याणि** | भक्षणस्य महत्वम् आवश्यकताञ्च अवगच्छति।<br>भक्षणाभावे का हानिरिति अवगच्छति। |
| **मूल्यम्/मनोभावः** | अन्नं न निन्द्यात्।<br>हितं भक्षणं भुङ्क्ष्व। |
| **पठनलक्ष्याणि** | भक्षणवैविध्यं परिचिनोति।<br>नूतनपदानाम् अर्थं लिखति।<br>लघुटिप्पणिं लिखति।<br>पाठं सम्भाषणरूपेण अवतारयति।<br>लट् लोट् रूपाणि वदति लिखति च। |
| **पठनक्षमता** | शुद्धं पोषकयुक्तं च भक्षणम् आरोग्याय इत्यवगच्छति।<br>चित्रकथाम् आस्वदते।<br>सम्भाषणपाटवम् आर्जयति।<br>चित्रकथायाः आशयं स्वांशीकरोति। |
| **कालांशाः** | १२ |

### पाठस्यामुखम्

छात्रेषु बहवः प्रातःकालभोजनं विना विद्यालयम् आगच्छन्ति। विद्यालये भोजने सत्यपि ते न खादन्ति च। पुनः केचन विद्यालयपरिसरात् आपणात् वा भोज्यानि स्वीकुर्वन्ति। शीलमिदं न साधु। आरोग्यसंरक्षणाय अवश्यं पोषकयुक्तं भोज्यं खादनीयमिति बालकान् बोधयितुं छन्दोग्योपनिषदः एषा कथा स्वीकृता।

## प्रवेशकप्रवर्तनम्

अध्यापिका विविधानां भोज्यानां चित्राणि प्रदर्शयति
चित्रे किं किं पश्यति?
भवन्तः प्रातः मध्याह्ने च भोजनं कृतवन्तो वा?
निश्चयेन भोजनं करणीयम्। भोजनस्य प्राधान्यं किमिति पश्यामः।

## पाठापग्रथनम्

उद्दालकमहर्षेः पुत्रः भवति श्वेतकेतुः। द्वादशवर्षं यावत् गुरुकलविद्याभ्यासानन्तरं सः गृहं प्रत्यागच्छति। तदा पिता "गुरुकुलात् किं भवान् पठितवान्" इति पृच्छति। 'वेदान् शास्त्राणि च सम्यक् अपठम्' इति सः प्रत्यवदत्। तदा पिता "अन्नस्य प्राधान्यमधिकृत्य पठितं वा" इति पृच्छति। सर्वं न पठितम्। तत् अधिकतया ज्ञातुमिच्छामि इति श्वेतकेतुः वदति। "अस्तु पुत्र! पञ्चदशदिनानि निराहारो भव। यथेष्टं जलं पिब" इति पुत्रं निर्दिशति। पञ्चदशदिनानन्तरं क्षीणः श्वेतकेतुः पितरं प्रत्यागच्छति। गुरोः सकाशात् अधीतं सर्वं वद इति पिता निर्दिशति। तदा हे पितः! अहं नितरां श्रान्तः पठितं सर्वं विस्मरामि इति प्रत्यवदत्। एवं चेत् त्वं भुक्त्वा विश्रमं कुरु इति पिता पुत्रं प्रतिप्रेषयति। ततः भोजनस्य विश्रमस्य चानन्तरं श्वेतकेतुः पितरं समेत्य पठितं सर्वं वदति। तदा पित्रा – "अधुना पठितं सर्वं कथं स्मरसि" इति पृष्टे भोजनानन्तरं मे आरोग्यं लब्धं तदा सर्वं स्मृतवान् इति पुत्रः अवदत्। अन्नम् आरोग्याय अनिवार्यम् इति सम्यक् अवागच्छम् ।

## चित्राणां विशदीकरणम्

उद्दालकमहर्षेः आश्रमस्य चित्रम्। आश्रमः पर्णैः निर्मितं भवति। तत्र अङ्कणे उद्दालकमहर्षिः श्वेतकेतुः च सम्भाषणं कुरुतः। आश्रमं परितः वृक्षाः सन्ति। वनमध्ये भवति आश्रमः। आश्रमाङ्कणपरिसरे उद्यानम् अस्ति। उद्याने विविधानि पुष्पाणि विलसन्ति। तत्र शलभाः पक्षिणश्च आगच्छन्ति। अङ्कणे वल्मीकं वर्तते। उद्दालकमहर्षेः हस्ते योगदण्डो वर्तते।

# पठनप्रवर्तनानि

## प्रवर्तनम् - १ भक्षणवैविध्यं परिचिनोति।

विविधानि भक्षणानि अधिकृत्य चर्चां करोति।

Bingo (Fast-food) चित्रं पोषकयुक्तं सग्धेः चित्रं च प्रदर्श्य चर्चायाः आरम्भं करोति।

अनयोः पोषकसमृद्धं किम्?

तस्य कारणं किम्?

पुनः विविधानां भक्षणानां चित्राणि प्रदर्श्य किं पोषकयुक्तं किं पोषकरहितम् इति विविच्य लिखतु इति निर्दिशति।

**मूल्यनिर्णयसूचकानि -** भागभागित्वम्, आशयावबोधः, अवतरणशैली।

**प्रवर्तनम् - २ नूतनपदानाम् अर्थं लिखति।**

अध्यापिका पाठभागस्थानि नूतनपदानि चित्वा टिप्पणिपुस्तके लेखितुं निर्दिशति। अनन्तरं पदकोशं निरीक्ष्य अर्थचयनाय साहाय्यं करोति।

**प्रवर्तनम् - ३ लघुटिप्पणिं लिखति।**

सूचनाः (पुटसंख्या ७३) दृष्ट्वा गणशः चर्चां कृत्वा टिप्पणीलेखनाय निर्दिशति। छात्रैः लिखितां टिप्पणीं परिष्कृत्य अध्यापिकायै दीयते।

यथा –

**भोजनम् आरोग्याय**

जीवने भक्षणम् अनिवार्यं भवति। आरोग्याय पोषकसमृद्धं भक्षणम् आवश्यकम् अस्ति। पोषकसमृद्धं भक्षणं यथासमयं खादनीयम्। हितं मितञ्च भक्षणं खादनीयम्। "एकवारं यो खादति स योगी, द्विवारं यो खादति स भोगी, त्रिवारं यो खादति स रोगी" इति विद्वांसः वदन्ति। (उद्ग्रथितसाध्यता-आयुर्वेदशास्त्रे भक्षणशीलान्यधिकृत्य सुव्यक्तं प्रतिपादितानि। तानि अधिकृत्य परिचायनम् अपि कर्तुं शक्यते।)

**मूल्यनिर्णयसूचकानि -** आशयावगमनम्, वाक्यघटना, शुद्धं लेखनम्।

**प्रवर्त्तनम् -४ पाठं सम्भाषणरूपेण अवतारयति।**

चित्रकथां सम्भाषणरूपेण अवतारणार्थं तस्य पठनम् अवश्यं भवति। तदर्थं चित्रकथायाः कथासन्दर्भग्रहणम् अपेक्षितम्। अतः अध्यापिका लघुवाक्यैः कथायाः सन्दर्भं वदति।

ततः छात्रान् सङ्घद्वयं करोति। प्रथमसङ्घः उद्दालकः द्वितीयसङ्घः श्वेतकेतुः च। अनन्तरं चित्रकथां पठित्वा सम्यक् एतयोः कथापात्रयोः अवतारणाय निर्दिशति। कथायाः सम्भाषणेतरभागः अध्यापिकया पठ्यते।

ततः उद्दालकसङ्घादेकः उद्धालकस्य सम्भाषणम् अवतारयतु। ततः प्रतिवचनरूपेण श्वेतकेतुसङ्घादेकः श्वेतकोतोः वचनम् अवतारयतु। एवं रूपेण सम्भाषणं कक्ष्यायाम् अवतारयतु। सर्वेभ्यः अवसरः देयः।

**मूल्यनिर्णयसूचकानि** - उच्चारणस्फुटता, आशयावबोधः, भावात्मकता।

**प्रवर्तनम् -५** लट् लोट् रूपाणि वदति लिखति च।

गतपाठे अनुबन्धे दत्तस्य अट् धातोः परस्मैपदी लट् रूपाणि, तथा पाठेऽस्मिन् अनुबन्धे विद्यमानं वद् धातोः परस्मैपदी लोट् रूपाणि च ICT द्वारा प्रदर्शयति। तत् दृष्ट्वा पुस्तकं पठित्वा च तेषां रूपाणां पट्टिकाकरणाय निर्दिशति। छात्राः सङ्घे स्थित्वा प्रवर्तनमिदं कर्तुं शक्नुवन्ति।

**मूल्यनिर्णयसूचकानि** - उचितं पूरणम्, लकारज्ञानम्, आशयावबोधः।

| यथा | **लट्** | **लोट्** |
|---|---|---|
| | गच्छसि | गच्छ |
| | इच्छामि | इच्छानि |
| | अभिलषति | अभिलषतु |
| | भवसि | भव |
| | पिबसि | पिब |
| | प्रत्यागच्छति | प्रत्यागच्छतु |
| | वदसि | वद |
| | स्मरसि | स्मर |
| | भवति | भवतु |

**अग्रिमपाठसंयोजकं प्रवर्तनम्**

पाठपुस्तके प्रदत्तं चित्रं (पुटसंख्या ७८) प्रदर्श्य एषः कः? एषः कस्यां क्रीडायां प्रसिद्धः इति पृच्छति। अग्रिमपाठे तादृशीम् एकां क्रीडां परिचिनुमः इति सूचयति।

## अनुबन्धः

### दशोपनिषदः

ईशकेनकठप्रश्नमुण्डमाण्डूक्यतित्तिरिः।
ऐतरेयञ्च छान्दोग्यं बृहदारण्यकं दश॥

१. ईशावास्योपनिषद्
२. केनोपनिषद्
३. कठोपनिषद्
४. प्रश्नोपनिषद्
५. मुण्डकोपनिषद्
६. माण्डूक्योपनिषद्
७. तैत्तिरीयोपनिषद्
८. ऐतरोयोपनिषद्
९. छान्दोग्योपनिषद्
१०. बृहदारण्योकोपनिषद्

## अष्टमः पाठः

# होक्की

| | |
|---|---|
| **आशयः** | भक्षणम्, आरोग्यम् च। |
| **उपाशयः** | क्रीडाः, कायिकविनोदाः च। |
| **व्यवहाररूपम्** | लघुविवरणम्। |
| **उद्देश्यानि/लक्ष्याणि** | छात्राः आरोग्यपरिपालने श्रद्धावन्तः भवेयुः। क्रीडया सारोग्याः भवितव्याः। व्यायामः शरीरस्य स्वास्थ्याय भवेत्। |
| **मूल्यम्/मनोभावः** | क्रीडाः आरोग्यसंरक्षणाय साहाय्यं करोति।<br>आरोग्यपरिपालनाय अत्यन्तापेक्षिताः भवन्ति व्यायामादयः।<br>आरोग्यसंरक्षणशीलानि नित्यजीवने अनुपालनीयानि। |
| **पठनलक्ष्याणि** | कायिकविनोदान् क्रीडकान् च विविच्य लिखति।<br>आरोग्यसुस्थितेः आवश्यकताम् अवगच्छति वदति च।<br>विभक्तिम् अनुसृत्य वाक्यं रचयति।<br>संख्याः गणयति लिखति च।<br>वर्णान् प्रत्यभिजानाति वदति च। |
| **पठनक्षमता** | आशयमवगम्य विविच्य लेखितुं सामर्थ्यं सम्पादयति। (विविच्य लेखनसामर्थ्यम्, वर्गीकृत्य आशयलेखनसामर्थ्यम्)<br>आशयलेखनसामर्थ्यम् (आशयकथनक्षमता)<br>उचितशीलानां प्रयोगसामर्थ्यम्<br>क्रीडाविनोदेषु नेतृसामर्थ्यम् |
| **कालांशाः** | १२ |

### पाठस्यामुखम्

पाठस्य प्रारम्भभागे केचन बिन्दवः क्रमरहितेन दृश्यन्ते। सूक्ष्मतया बिन्दूनां योजनाय अध्यापिका निर्दिशति। बिन्दून् योजयित्वा चित्रं कक्ष्यायां प्रदर्शयति। कः विनोदः भवति एषः? इति प्रश्नकथनेन होक्की इति पाठभागः समारभते।

### प्रवेशकप्रवर्तनम्

भारते विविधाः क्रीडाविनोदाः सन्ति। क्रीडादयः मानवानां मानसिकोल्लासाय आरोग्याय सुस्थित्यै च महदुपकुर्वन्ति। आरोग्यपरिपालनाय क्रीडाणां प्रसक्तिं निरीक्ष्य होक्कीक्रीडायाः महत्वं चर्चयति।

### पाठापग्रथनम्

भारतस्य प्रमुखान् कायिकविनोदान् अधिकृत्य संक्षिप्ततया विशदीकरोति। ओलिम्बिक्स् स्पर्धायां भारतस्य होक्कीक्रीडायाः प्रसक्तिः योगदानञ्च महत्तरं भवति। प्रमुखान् क्रीडकान् परिचिनोतुम् अवसरमपि कक्ष्यायां प्रददाति।

### चित्राणां विशदीकरणं

पाठभागस्थानां होक्कीक्रीडकानां चित्राणि ICT द्वारा प्रदर्श्य तेषां नामानि पृच्छति। इतरक्रीडकानां इतरकायिकविनोदानाञ्च नामानि पृच्छति। भारतस्य होक्कीक्रीडकानां चित्रसमाहरणाय प्रोत्साहयति च।

## पठनप्रवर्तनानि

### प्रवर्तनम् - १ कायिकविनोदान् क्रीडकान् च विविच्य लिखति।

क्रीडकानां नामानि तेषां कायिकविनोदान् च योजयति। प्रवर्तनेऽस्मिन् विविधकायिकविनोदेषु प्रमुखस्थानमावहतां क्रीडकानां नामानि, चित्राणि, कायिकविनोदाः च समावेशितानि।

क्रीडकानां नामानि चित्राणि तेषां कायिकविनोदान् च यथोचितं योजयति। क्रीडकानां सविशेषताः प्रावीण्यं, प्रतिभां, पुरस्कारान् च अधिकृत्य संक्षिप्ततया चर्चयति। एवं विविधकायिकविनोदानां क्रीडकानां च सम्पुटनिर्माणाय प्रेरयति च।

**मूल्यनिर्णयसूचकानि -** उचितयोजनम्

प्रवर्तनम् -२ **आरोग्यसुस्थितेः आवश्यकताम् अवगच्छति वदति च।**

आरोग्यपरिपालने गुणदोषान् अधिकृत्य चर्चां चालयति। सूचकानि - गुणाः के, दोषाः के। तदनु पाठभागस्थं प्रवर्तनं कर्तुं निर्दिशति।

**मूल्यनिर्णयसूचकानि -** आशयावगमनम्, उचितचयनम्, लेखनशुद्धिः।

प्रवर्तनम् - ३ **विभक्तिम् अनुसृत्य वाक्यं रचयति।**

विभक्तिमनुसृत्य पूर्तीकरणाय कांश्चन मातृकाः चित्रसहितं (पुटसंख्या ८१) प्रदत्ताः। वाक्यम् अपूर्णतया दत्तम्। विभक्तिसहितस्य उचितपदस्य चयनेन लेखनेन च वाक्यार्थम् अवगच्छति। एवम् अपूर्णखण्डिकाः, अशुद्धखण्डिकाः अपि प्रदाय संशोधनाय निर्देष्टुं शक्यते।

**मूल्यनिर्णयसूचकानि -** उचितपदचयनम्, आशयावबोधः।

**प्रवर्तनम् - ४ संख्याः गणयति लिखति च।**

क्रीडातत्पराणां कृते समायोजितं प्रवर्तनं भवति – संख्यानुसारं लक्ष्यं प्राप्नोतु इति। अत्र लक्ष्यं प्राप्तुं मार्गमपि विवृणोति। एवं बिन्दून् योजयित्वा चित्रपूर्तीकरणाय निर्दिशति। अत्रापि सविशेषश्रद्धार्हाणां कृते उचितः अवसरः प्रदेयः। दूरवाण्यां रिक्तसंख्याः यथाक्रमं पूरयतु इत्यत्र संख्याः काः इति मत्वा रिक्तस्थाने लेखनीयाः सन्ति।एवम् इतराः अपि मातृकाः स्वीकुर्युः।

**प्रवर्तनम् - ५ वर्णान् प्रत्यभिजानाति वदति च।**

अध्यापिका विविधवर्णयुक्तानि वस्तूनि प्रदर्श्य तेषां वर्णान् बोधयति। तेषां चित्राणि टिप्पणिपुस्तके विलिख्य उचितवर्णलेपनाय निर्दिशति। अनन्तरं पाठभागस्थं प्रवर्तनं कर्तुं सूचयति।

**अग्रिमपाठसंयोजकं प्रवर्तनम्**

धोण्याः जीवनमधिकृत्य एम्. एस्. धोणि दि अण्टोल्ड् स्टोरि इति चलच्चित्रम्/ चलच्चित्रभागान् प्रदर्शयति। सूचनानुसारं (पुटसंख्या ८६) चर्चां करोति।

# एककम् - ४

# सर्गात्मिका कला

मानवजीवने कलायाः प्रभावः अत्यधिकः इत्यत्र नास्ति सन्देहः। अत एव मानवराशेः प्रगतये कलाः अनुपेक्षणीयाः एव। कलाविहीनाः मानवाः साक्षात् अरसिकाः भवन्तीति सत्यमेव। कलाः मनोरञ्जकाः आस्वादनप्रदायकाः,आत्मविचिन्तनद्योतकाः च भवन्ति। कलया मानसिकोल्लासः, आत्माभिमानं ,मूल्यबोधः, स्वत्वबोधः च संवर्धते।   सर्गात्मकतायाः वैभवं द्योतयितुं चलच्चित्रं, श्रुतिसुखदम् इति पाठद्वयं सन्निवेशितम्।

## नवमः पाठः

# चलच्चित्रम्

| | |
|---|---|
| **आशयः** | कला |
| **उपाशयः** | चलच्चित्रम् |
| **व्यवहाररूपम्** | लघुविवरणम् |
| **उद्देश्यानि/लक्ष्याणि** | चलच्चित्राणां वैविध्यम् अवगच्छति।<br>संस्कृतचलच्चित्राणि पश्यति आस्वदते।<br>संस्कृतचलच्चित्राणां सविशेषताः अभिजानाति। |
| **मूल्यम्/मनोभावः** | कलास्वादने आभिमुख्यम्।<br>चलच्चित्राणाम् आस्वादने तात्पर्यम्।<br>संस्कृतचलच्चित्राणां दर्शने तात्पर्यम्। |
| **पठनलक्ष्याणि** | संस्कृतचलच्चित्राण्यधिकृत्य चर्चां करोति।<br>नूतनपदानाम् अर्थं लिखति।<br>प्रश्नोत्तरनिर्माणं करोति।<br>ह्रस्वचलच्चित्रं निर्माति।<br>वासराणां नामानि वदति लिखति च। |
| **पठनक्षमता** | चलच्चित्राणि आस्वदते।<br>चलच्चित्राणां प्रमेयं स्वांशीकरोति।<br>सर्गवासनाः वर्धन्ते। |
| **कालांशः** | १३ |

**पाठस्यामुखम्**

जनप्रियं कलारूपं भवति चलच्चित्रम्। भारतीयचलच्चित्रम्, केरलीयचलच्चित्रं तथा संस्कृतचलच्चित्रं च अधिकृत्य पाठेऽस्मिन् विवृणोति।

### प्रवेशकप्रवर्तनम्

ओक्टोबर् २ इति दिनस्य सविशेषता का? अस्माकं राष्ट्रपितुः महात्मगान्धिनः जन्मदिनं भवति ओक्टोबर् २। एनमधिकृत्य कृतं चलच्चित्रं भवता दृष्टं वा? भवतः प्रियतमानि चलच्चित्राणि कानि? प्रियतमान् चलच्चित्रप्रतिभाधनान् अधिकृत्य चर्चां करोति।

### पाठापग्रथनम्

पाठेऽस्मिन् चलच्चित्राणि अधिकृत्य विशदीकरोति। प्रसिद्धानि चलच्चित्राणि, निर्देशकाः, अभिनेतारः, चलच्चित्रविभागाश्च परामृष्टाः। विशिष्य पाठेऽस्मिन् संस्कृतचलच्चित्राण्यधिकृत्य चर्चां कर्तुम् अवसरोऽस्ति। संस्कृतभाषया निर्मितस्य प्रथमचलच्चित्रस्य आदिशङ्कराचार्यस्य महनीयता अत्र वर्णिता भवति। चलच्चित्रास्वादनविषयेषु तत्परान् छात्रान् अग्रे नेतुं समर्थः भवति अयं पाठः।

### चित्राणां विशदीकरणं

प्रमुखभारतीय-केरलीयचलच्चित्रप्रवर्तकानां चित्राणि। प्रथमसंस्कृतचलच्चित्रस्य आदिशङ्कराचार्यस्य भित्तिपत्रिका तथा प्रसिद्धसंस्कृतचलच्चित्राणां च भित्तिपत्रिकाः।

## पठनप्रवर्तनानि

### प्रवर्तनम् - १ संस्कृतचलच्चित्राण्यधिकृत्य चर्चां करोति।

इतरभाषाचलच्चित्राणि द्रष्टुम् इच्छन्ति वा? तानि कासु कासु भाषासु पश्यन्ति? संस्कृतचलच्चित्राणि दृष्टवन्तः किम्? अध्यापिका एतादृशप्रश्नान् पृच्छति। तदनु सूचनाः (पुटसंख्या ९०) अधिकृत्य चर्चां करोति, विलिख्य अवतारयति च। (उद्ग्रथनसाध्यताः- विविधभाषाचलच्चित्राणाम् आस्वादनं तथा सविशेषताः, संस्कृतचलच्चित्रैः भाषायाः प्रचाराः कथं सम्भवति इति विचिन्तनम् चाधिकृत्य चर्चां कर्तुं शक्नोति।)

**मूल्यनिर्णयसूचकानि** आशयावगमनम्, अवतरणशैली, भागभागित्वम्, वाक्यघटना

### प्रवर्तनम् - २ नूतनपदानाम् अर्थं लिखति।

अध्यापिका पाठभागस्थानि नूतनपदानि चित्वा टिप्पणिपुस्तके लेखितुं निर्दिशति।

अनन्तरं पदकोशं निरीक्ष्य अर्थचयनाय साहाय्यं करोति।

**प्रवर्तनम् - ३ प्रश्नोत्तरनिर्माणं करोति।**

अध्यापिका लघुखण्डिकाः स्फोरकपत्रे वा ऐ.सी.टि माध्यमेन वा प्रदर्शयति। अनन्तरं वाचनाय कथयति। विषयानुगुणं प्रश्नान् पृच्छति। छात्राः तदनुगुणम् उत्तराणि वदन्ति।लघुवाक्यैः लेखितुं साहाय्यं प्रददाति।

यथा-भारतीयचलच्चित्रमधिकृत्य लघुखण्डिकां ददाति। तां पठित्वा प्रश्नान् निर्मीय उत्तराणि लिखति।

मानवचरित्रस्य अतिशयतमाविष्कारं भवति चलच्चित्रम्। सामान्यजनानां कृते प्रथमचलच्चित्रप्रदर्शनं लूमियर् सहोदराभ्यां विहितम्। भारतीयचलच्चित्रस्य पिता इति प्रथितः भवति दादा साहेब् फाल्के महाशयः। चलच्चित्रस्तरे योगदानं कृतवद्भ्यः आदरणाय केन्द्रसर्वकारेण १९६९ वर्षादारभ्य दादा साहेब् फाल्के पुरस्कारः दीयते। प्रथमभारतीयशब्दचलच्चित्रं भवति आलम् आरा। १९३१ तमे वर्षे चलच्चित्रमिदं लोकार्पणं कृतम्। प्रथमतया देशीयचलच्चित्रपुरस्कारदानं १९५४ तमे आसीत्।

प्रथमचलच्चित्रप्रदर्शनं काभ्यां विहितम्?

भारतीयचलच्चित्रस्य पिता कः?

प्रथमभारतीयचलच्चित्रं किम्?

आलम् आरा कदा लोकार्पणं कृतम्?

**कैरलीचलच्चित्रम्**

प्रथमकैरलीनिश्शब्दचलच्चित्रं भवति विगतकुमारन्। अस्य चलच्चित्रस्य निदेशकः भवति जे सि दानियेल्। अयं कैरलीचलच्चित्रस्य पिता इति प्रथितः भवति। प्रथमशब्दचलच्चित्रं भवति बालन् । १९३८ तमे वर्षे इदं चलच्चित्रं लोकार्पणं कृतम्। प्रथम 3D (त्रिमानचलच्चित्रम्) भवति 'मै डियर् कुट्टिच्चात्तन्' । राष्ट्रपतिपुरस्कारेणादृतं प्रथमकैरलीचलच्चित्रं भवति चेम्मीन्।

प्रथमकैरलीनिशब्दचलच्चित्रं किम्?

विगतकुमारन् इति चलच्चित्रस्य निदेशकः कः?

प्रथमकैरलीशब्दचलच्चित्रस्य नाम किम्?

प्रथमत्रिमानकैरलीचलच्चित्रं किम्?

संस्कृतचलच्चित्रम्

भारतीयचलच्चित्रशाखासु अन्यतमं भवति संस्कृतचलच्चित्रम्। १९८३तः पञ्चदशाधिकानि चलच्चित्राणि प्रकाशितानि भवन्ति। तेषु प्रथमं भवति आदिशङ्कराचार्यः। इदं देशीयचलच्चित्रपुरस्कारेण सम्मानितम्। केरलदेशे संस्कृतचलच्चित्रस्य समारम्भः २०१५ तः भवति। अत्रत्य प्रथमचलच्चित्रं भवति प्रियमानसम्। विनोद् मङ्करा भवति तस्य निदेशकः।

प्रथमसंस्कृतचलच्चित्रं किम् ?

आदिशङ्कराचार्यस्य निदेशकः कः?

प्रियमानसम् इति संस्कृतचलच्चित्रस्य निदेशकः कः?

एवं चलच्चित्रसम्बन्धान् प्रश्नान् विलिख्य उत्तराणि लिखति।

**मूल्यनिर्णयसूचकानि -** उचितप्रश्नलेखनम्, उचितोत्तरलेखनम्, वाक्यघटना

**क्रीडा**

अक्षरयुक्तानि कागदखण्डानि दत्वा तेषां क्रमीकरणाय गणान् निर्दिशति। क्रमीकरणात् प्राक् लब्धानां सुप्रसिद्धचलच्चित्राणां नामानि टिप्पण्यां लिखति। ह्रस्वतमेन यः सर्वं क्रमीकरोति सः गणः विजयी भवति।

वि त कु ग रन् मा - विगतकुमारन्

**प्रवर्तनम् - ४ ह्रस्वचलच्चित्रं निर्माति।**

विविधसंस्कृतह्रस्वचलच्चित्राणि प्रदर्शयति।दृष्टचलच्चित्रमधिकृत्य कांश्चन प्रश्नान् पृच्छति।

१. ह्रस्वचलच्चित्रम् इष्टवन्तः वा ?

२. अस्य प्रमेयम् अवगतवन्तः वा

३. चलच्चित्र-ह्रस्वचलच्चित्रयोः मध्ये भेदः कः

चर्चितांशान् अध्यापिका क्रोडीकृत्य वदति। नूतनह्रस्वचलच्चित्रनिर्माणसमये

श्रद्धेयान् अंशान् अपि सूचयति।(उद्ग्रथनसाध्यता:- चलच्चित्रमण्डलस्य विविधस्तरानधिकृत्य पठनम्)

**सूचना:-** विषयस्वीकारः, पटकथारचना, कथापात्रचयनम्, छायाग्रहणम्, संशोधनम्, .....

अनन्तरं ह्रस्वचलच्चित्रं निर्मीय अवतारयति।

**मूल्यनिर्णयसूचकानि -** भागभागित्वम्, अवतरणशैली, विषयस्वीकारः

**प्रवर्तनम् - ५ वासराणां नामानि वदति लिखति च ।**

दिनदर्शिकां प्रदर्श्य वासरान् परिचाययति। अनन्तरम् अध्यापिका तिथीः वदति। तासां वासरकथनाय निर्दिशति।

यथा –

जनुवरि २ कः वासरः?

एवं सविशेषदिनानि अपि पृष्ट्वा वासरं लेखितुं वदति।

स्वातन्त्र्यदिनम्

गणतन्त्रदिनम्

परिस्थितिदिनम्

**मूल्यनिर्णयसूचकानि** उचितचयनम्, आशयावबोधः, लेखनशुद्धिः

**अग्रिमपाठसंयोजकं प्रवर्तनम्**

संस्कृतचलच्चित्राणि दृष्ट्वा तेषां वैशिष्ट्यं, चलच्चित्रगानानि च अधिकृत्य सूचनानुसारं (पुटसंख्या ९४) चर्चां करोति। ततः कैरलीचलच्चित्रेभ्यः संस्कृतगानानि श्रुतवन्तः वा इति पृच्छति। कानिचन उदाहरणानि श्रावयति वदति च। तेषु प्रसिद्धानां गानानां प्रणेतारम् अधिकृत्यैव अग्रिमः पाठः।

# अनुबन्धः

## संस्कृतचलच्चित्राणि

| | | |
|---|---|---|
| आदिशङ्कराचार्य | - | जी. वि. अय्यर् |
| भगवद्गीता | - | जी. वि. अय्यर् |
| प्रियमानसम् | - | विनोद् मङ्करा |
| इष्टिः | - | डा.जि.प्रभा |
| सूर्यकान्तः | - | एम्. सुरेन्द्रः |
| तया | - | डा.जि.प्रभा |
| नमो | - | विजीष् मणि |
| अनुरक्तिः | - | पि.के.अशोकः |
| मधुरस्मितम् | - | सुरेष् गायत्री |
| भगवदज्जुकम् | - | यदु विजयकृष्णन् |
| प्रतिकृतिः | - | निधीष्.एम्.जि |

## दशमः पाठः

# श्रुतिसुखदम्

| | |
|---|---|
| **आशयः** | कला |
| **उपाशयः** | सङ्गीतम् |
| **व्यवहाररूपम्** | लघूपन्यासः |
| **उद्देश्यानि/लक्ष्याणि** | संस्कृतचलच्चित्राणि परिचिनोति। |
| | संस्कृतचलच्चित्रगानानि आस्वदते। |
| | चलच्चित्रमण्डले संस्कृतगानकर्तॄणां योगदानं परिचिनोति। |
| | मलयालचलच्चित्रेषु संस्कृतगीतानि सन्तीत्यवगच्छति। |
| **मूल्यम्/मनोभावः** | संस्कृतगानास्वादने आलपने च तात्पर्यम्। |
| | इतरसंस्कृतगानरचयितॄन् अधिकृत्य ज्ञातुं तात्पर्यम्। |
| **पठनलक्ष्याणि** | यूसफलि केच्चेरीम् अधिकृत्य लघुवाक्यानि लिखति। |
| | नूतनपदानाम् अर्थं लिखति। |
| | लघुवाक्यानि लिखति। |
| | संस्कृतचलच्चित्रगीतानि अधिकृत्य वदति लिखति च। |
| | गद्यभागं पठित्वा प्रश्नानाम् उत्तरं वदति लिखति। |
| **पठनक्षमता** | संस्कृतचलच्चित्रगीतानि अधिकृत्य ज्ञानम् आर्जयति। |
| | लघुवाक्यलेखने सामर्थ्यम् आर्जयति। |
| **कालांशः** | १२ |

## पाठस्यामुखम्

सङ्गीतमपि साहित्यं

सरस्वत्यास्तनद्वयम्।

एकमापादमधुरम्

अन्यदालोचनामृतम्॥

श्लोकेऽस्मिन् सङ्गीतम् आपादमधुरम् इति वदति। "शिशुर्वेत्ति पशुर्वेत्ति वेत्ति गानरसं फणी" इत्यन्योक्तिरपि वर्तते।

महत्तमा कला भवति चलच्चित्रम्। ततः चलच्चित्रगानम् इति गानशाखापि आविर्भूता। कालान्तरेण संस्कृतचलच्चित्रगानान्यपि आविर्भूतानि। तत्र संस्कृतचलच्चित्रगानरचयिता यूसफलि केच्चेरी प्रातःस्मरणीयो भवति।

## प्रवेशकप्रवर्तनम्

ICT द्वारा जानकीजने... राम इति गानं श्रावयति।तदनु प्रश्नान् पृच्छति।

इदं गानं भवन्तः श्रुतवन्तो वा?

गानमिदं कीदृशं भवति?

कस्मिन् चलच्चित्रे भवति गानमिदम्?

इदं कस्यां भाषायां लिखितम्?

केन लिखितम्?

## पाठापग्रथनम्

मलयालचलच्चित्रेषु संस्कृतचलच्चित्रगानानन्यपि सन्ति। तेषु जानकीजाने... कृष्णकृपासागरम्..., इत्यादीनि प्रसिद्धानि भवन्ति। तेषां रचयितारं यूसफलि केच्चेरी महाभागम् अधिकृत्य लघुविवरणमेवात्र प्रदत्तम्।

## चित्राणां विशदीकरणम्

यूसफलिकेच्चेरी महाभागस्य चित्रम्। इटक्का, हार्मोणियम्, मद्दलम्, तबला एतेषां वाद्योपकरणानां चित्राणि।

## पठनप्रवर्तनानि

**प्रवर्तनम् - १ यूसफलि केच्चेरीम् अधिकृत्य लघुवाक्यानि लिखति।**

आलिला, केच्चेरिप्पुषा, नादब्रह्मम्, मुखपटमिल्लाते, अञ्चु कन्यककल् इत्यादिभ्यः कविताभ्यः एकैकां श्रावयति। ततः प्रश्नान् पृच्छति।

कविता श्रुतपूर्वा वा?

अस्याः विषयः कः?

एवं यूसफलिकेच्चेरिमहोदयस्य मलयालकवितासमाहारान् सूचनाः (पुटसंख्या ९७) अधिकृत्य चर्चां करोति।

**मूल्यनिर्णयसूचकानि -** आशयग्रहणम्, भागभागित्वम्, अवतरणशैली

**प्रवर्तनम् - २ नूतनपदानाम् अर्थं लिखति।**

अध्यापिका पाठभागस्थानि नूतनपदानि चित्वा टिप्पणिपुस्तके लेखितुं निर्दिशति। अनन्तरं पदकोशं निरीक्ष्य अर्थचयनाय साहाय्यं करोति।

**प्रवर्तनम् - ३ लघुवाक्यानि लिखति।**

अध्यापिका एकं छात्रमाहूय नाम पृच्छति। पितुः मातुः सोदरस्य सोदर्याः च नामानि पृच्छति। तानि श्यामफलके लिखति।

यथा

यमुना- माता

रम्या – सोदरी

अरुणः- सोदरः

सुरेषः - पिता

तदनु प्रथमम् उत्तरम् उक्त्वा प्रश्नान् पृच्छति ।

यथा-

सोमस्य पिता सुरेषः भवति।

सोमस्य पिता कः?

सोमस्य माता यमुना भवति।

सोमस्य माता का भवति?

एतदनन्तरं पाठपुस्तके दत्तं पदसूर्यं दृष्ट्वा वाक्यनिर्माणाय निर्दिशति।

**मूल्यनिर्णयसूचकानि -** आशयावगमनम्, पदज्ञानम्, वाक्यशुद्धिः

**प्रवर्तनम् - ४ संस्कृतचलच्चित्रगीतानि अधिकृत्य वदति लिखति च।**

पाठपुस्तके दत्तानि गीतानि video clip द्वारा प्रदर्शयति। तस्मिन् समये चित्रस्य नामानि प्रदर्शयति। तदनन्तरं पाठभागस्थं प्रवर्तनं कर्तुं निर्दिशति। टिप्पणीपुस्तके लिखति च।

**यथा -**

| | |
|---|---|
| जानकीजाने... | ध्वनि |
| कृष्णकृपासागरम्... | सर्गम् |
| मानव माधव मधुमाथि... | फैव् स्टार् होस्पिट्टल् |
| चञ्चल चञ्चल नयनम्.... | कल्याणपन्तल् |
| ब्रूहि कृष्ण घनश्याम.. | इङ्गने ओरु निलापक्षि |

**मूल्यनिर्णयसूचकानि -** उचितं योजनम्, अक्षरशुद्धिः

**प्रवर्तनम् ५ गद्यभागं पठित्वा प्रश्नानाम् उत्तरं वदति लिखति।**

अध्यापिका ICT द्वारा एकां लघुखण्डिकां प्रदर्शयति। तत्र कानिचन पदानि अधोरेखाङ्कितानि भवन्ति। तदनु प्रश्नान् पृच्छति। उत्तराणि वक्तुं निर्दिशति। यथा भारतीयसंस्कृतेः आधारभूता भवति संस्कृतभाषा। अस्याः भाषायाः ज्ञानविज्ञानसम्पत् अतिविशिष्टा भवति। तस्याः साहित्यशाखा अपि अतिविपुला भवति। विश्वप्रसिद्धं संस्कृतनाटकं भवति अभिज्ञानशाकुन्तलम्। नाटकमिदं कालिदासविरचितं भवति।

भारतीयसंस्कृतेः आधारभूता का?

संस्कृतभाषायाः साहित्यशाखा कीदृशी भवति?

विश्वप्रसिद्धं संस्कृतनाटकं किम्?

तदनु गद्यभागं पठित्वा प्रश्नानाम् उत्तरं लेखितुं निर्दिशति।

**मूल्यनिर्णयसूचकानि** - उचितम् उत्तरम्, आशयावबोधः, अक्षरशुद्धिः

## अनुबन्धः

**लट् लकारेण सह स्म योगे भूतकालार्थः भवति।**

पठति स्म- अपठत्

वदति स्म- अवदत्

लिखति स्म - अलिखत्

पिबति स्म - अपिबत्

**तुमुन्नन्तमव्ययम्**

पठति - पठितुम्

बालकः पठितुं विद्यालयं गच्छति।

लिखति - लेखितुम्

बालिका लेखितुं लेखनीं स्वीकरोति।

पिबति- पातुम्

माता फलरसं पातुम् इच्छति।

गायति- गातुम्

गायकः गीतं गातुं तञ्चावूर् गच्छति।

# पाठासूत्रणम्

## दैनिकासूत्रणम्

प्रशिक्षकस्य नाम –

दिनाङ्कः –

विद्यालयस्य नाम –

कक्ष्या –

एककस्य संख्या –

एककस्य नाम –

पाठसंख्या –

पाठस्य नाम –

आशयः –

उपाशयः –

उद्देश्यानि/लक्ष्याणि –

व्यवहाररुपम् –

कालांशः –

मुल्यम्/मनोभावः –

क्षमता/नैपुणी –

पठनलक्ष्याणि –

| प्रवेशकप्रवर्तनम् |
| --- |
| |

| प्रवर्तनपुटम् | प्रतिकरणपुटम् |
| --- | --- |
| | |

| प्रतिफलनपुटम् |
| --- |
| |